CONTENTS

पापोक्त्युन्मुक्तसीतो लवणमथ समामर्द्य शत्रुघ्ननाम्ना
व्याहिंसीः शूद्रपाशं सुतयुगमभवत् तेऽथ वाल्मीकिवाचा ।
भूमन् भूजाप्तिकामे त्वयि भुवमगमत् साथ सर्वैः स्वकीयैः
साकं वैकुण्ठमूर्ते निजपदमगमो राममूर्ते नमस्ते ॥१०॥

अत्रेः पुत्रं च दत्ताभिधमथ जमदग्न्यात्मजत्वं प्रपन्नं
भृग्वीशं शक्तिमन्तं करधृतपरशुं कार्तवीर्यार्जुनारिम् ।
रक्तस्रोतोवहायां खलधरणिभृतां तर्पयन्तं पितॄंस्त्वां
नित्यं वन्दामहे मां पवनपुरपते श्रीपते पालयेथाः ॥११॥

१२

देवैर्देवारिभीतैर्विविधनुतिपरैः प्रार्थितो भूतधात्री-
भारक्षेपाय पूर्वं विधिहरसहितैः प्रीतचेतास्तदा त्वम् ।
भूत्वाहं भूतले तान् रणशिरसि खलान् संहरन् संहरिष्ये
तापं युष्माकमुक्त्येत्यहह विधिमुखान् प्रीणयामासिथैनान् ॥१॥

अन्तर्धिं तन्वति त्वय्यथ विबुधवरैस्तत्क्षणे त्वां प्रणम्य
स्वान्तस्सन्तोषपूर्णैर्निजनिजसदने तूर्णमाहिण्ड्यमाने ।
गृह्णन् पाणिं सुतायास्सकलगुणनिधेर्देवकस्यागमत्स्वं
राज्यं शौरिस्स धीमान् भुवि महितरथेनाथ कंसेन साकम् ॥२॥

हन्ता त्वां हन्त राजन् स्वसुरिह तनयस्त्वष्टमोऽस्यास्तवेति
श्रुत्वायं नाभसीं तां गिरमधिकभिया हन्तुमेनां कृपाणीम् ।
गृह्णन् कंसस्तदास्याश्चिकुरभरमथाकृष्य बालार्पणोक्त्या
संप्रीतः सान्त्वितोऽगान्निजगृहमतिभीतेन शूरात्मजेन ॥३॥

भोजेन्द्रो जातु जातं तव सहजमनेनार्पितं शौरिणा प्राङ्

नाहन् स्नेहेन यावत्त्रिदशमुनिरमुं तावदेत्यैवमूचे ।

मायावी त्वां हनिष्यन् स हरिरतिखलं वृष्णिवंशे भविष्य-

त्येते देवांशभूता यदव इह विभो वेत्सि तत्त्वं न किं त्वम् ॥४॥

वाणीमाकर्ण्य वीणाधरमुनिभणितां रोषपूर्णारुणाक्षः

सूनूनाहत्य शौरेस्स तु तव पितरौ बन्धनस्थावकार्षीत् ।

नीते त्वन्मातृकुक्षेस्तव खलु वचसा मायया रोहिणीं तां

भोगीन्द्रे भोगिशायिंस्त्वमपि खलु विभो देवकीगर्भमागाः ॥५॥

प्रावृट्काले प्रवृत्ते प्रमदतरलिते देहिवर्गे निशीथे

भेशे त्वाशां प्रपन्ने शशिनि वलरिपोः शोभमाने मुहूर्ते ।

देवक्या गर्भपालात् करकलितगदाशङ्खपङ्केरुहारिः

प्रादुर्भूतो व्यलासीर्मकुटमुखमहाकल्पदीप्राकृतिस्त्वम् ॥६॥

भूमन् भूतेशमुख्यप्रणतपद विभो देवदेव प्रसीदे-

त्येताभ्यां त्वं पितृभ्यां प्रणयविनयभक्तिप्रमोदाकुलाभ्याम् ।

द्वाभ्यां गोभ्यां पिबद्भ्यां तव वपुरधिकं स्तूयमानोऽथ ताभ्या-

मुक्त्वा प्राग्जन्मवृत्तं मुदितमतिरधा मानुषं बालवेषम् ॥७॥

व्यत्यासं कर्तुकामस्तदनु तव पिता नन्दपुत्र्या त्वदुक्त्या

हस्ते संगृह्य च त्वां स्वयमिह विवृतं द्वारदेशं व्यतीतः ।

चक्रीशे छत्रभूते पथि मणिकिरणापास्तघोरान्धकारे

तीर्त्वा तां सूरपुत्रीं प्रपदमितजलां घोषमापत् सतोषः ॥८॥

भूयस्त्वां शाययित्वा शयितनिखिलगोपालिकावीतनन्द-
प्रेयस्याः सूतितल्पे तव पितरि समादाय मायाकिशोरीम् ।
गेहं गत्वा पुरेव स्थितवति सविधं भोजराजश्च तावद्
बालाक्रन्दास्तनिद्रत्वरितभटजनज्ञातसूतिः प्रपेदे ॥९॥

दृष्ट्वा धृष्टः स कंसः स्वसृभुजलसितां बालिकां निष्ठुरात्मा
कष्टं प्रोत्क्षिप्य रुष्टः प्रसभमहह! तां पिष्टवानश्मपृष्ठे ।
धृत्वा सा पुष्टशोभं खलकरत इहोत्पत्य हृष्टा स्वरूपं
निष्पेष्टा ते भवेत् कुत्रचिदिति गिरमुक्त्वाथ तं निर्गताभूत् ।

प्रातः संत्रास्तभोजाधिपगदितजगन्मातृवाक्यप्रकुप्यद्-
व्योमाघारिष्टकेशिप्रमुखदनुजभोज्यायिते बालकौघे ।
गोपीशय्याशयाने त्वयि रुदति विबुध्याथ गोप्यो ममज्जु-
स्त्वां प्रेक्ष्यानन्दसिन्धौ चिरमव स तु मां देव वातालयेश ॥११॥

१३

कालाम्भोदालिभासं कुचगलितपयःपानहेलं महेला-
पालीदोःपङ्कजालीतरलभसलकेलीवहं कोमलाङ्गम् ।
नालीकाक्षं सनीलालकललितमुखव्रीलिताब्जं भवन्तं
गाढं संश्लिष्य पत्न्या सह सुकृतनिधिर्लालयामास नन्दः ॥१॥

घोषे त्वज्जन्मघोषे सति नृपपुरयातं करस्पर्शनार्थं
घोषेशं वीक्ष्य शौरिस्त्वयि निहितमतिस्त्वेकदा तं बभाषे ।
त्वत्पुत्रे सौहृदान्मत्सुत इव मम हृद्येधते स्नेहभार-
श्चोत्पातालोकभीता वयमिह तदितो गच्छ तूर्णं प्रियेति ॥२॥

श्रुत्वैवं नन्दगोपे गतवति भवतो नाशभीत्या स्वगेहं
क्षिप्रं कंसेरिता त्वद्गृहमभिपतिता कापि घोरासुरस्त्री ।
विख्याता पूतनेति प्रधृतललितमूर्तिर्निकृत्तार्भकौघा
धृत्वा त्वां दुष्टचित्ता मुषितयुवतिचित्ता ददौ सा स्तनं ते ॥३॥

दैत्यानां कालरूप त्वयि पिबति सहैवासुभिः स्तन्यमस्याः
क्रीडत्यस्या मृताया उरसि युवतिभिर्मातृपाणीप्रणीते ।
आगत्याकर्ण्य वार्तां निखिलपशुपकैस्तत्र दग्धात् प्रभूतो
धूमः पैशाचदेहादतिसुरभिरभूत् तावकाङ्गप्रसङ्गात् ॥४॥

चित्रं बालः पिशाच्या न हृत इति मुदा नन्दमुख्यैः प्रहृष्ट-
स्तुष्ट्या घोषेऽवसः प्रत्यहमधिकतरं वर्धयंस्तत्र लक्ष्मीम् ।
दृष्टाहं बालकेन स्मितमिह विहितं मां प्रति स्वीयपाणी
प्रोत्सार्येह्येहि वत्सेत्यजित भवति किं किं न चक्रे वधूभिः ॥५॥

त्वज्जन्मर्क्षे जनन्याः शकटनिकटतः शायितो गेहकृत्ये-
ष्वत्यन्तोद्योगवत्या कपटशकटमुत्पाटयामासिथ त्वम् ।
उत्क्षिप्ताङ्घ्रिस्तदा तच्चटचटरवमाकर्ण्य तत्रैत्य सर्वे
तस्थुर्नासाग्रदत्ताङ्गुलय उरुभयाश्चर्ययुक्ता मुहूर्तम् ॥६॥

को हेतुः पाटनेऽस्येत्यभिलपति जने रोदने बालकस्या-
लोलाङ्घ्र्याघातनिष्पाटितमिदमन इत्यूचिरे बालकास्ते ।
तावद् बालोक्तमेतन्न घटत इति सङ्कीर्त्य संभोज्य विप्रान्
गोपैर्भुक्त्वा स नन्दस्तव मुखविधुमालक्ष्य हृष्टो न्यवात्सीत् ॥७॥

भूमन्, भूयः कदाचिद् गुरुभरभरितं वोढुमत्यक्षमा त्वा-
माधायाम्बाधितल्पं किमिदमिति विभो हन्त चिन्ताकुलाभूत्।
तावद् वात्यावपुस्त्वामहरदहह ! दैत्यस्तृणावर्तनामा
दूरादेवातिवेगप्रचलदतुलरेणूत्करापूरिताशः ॥८॥

घोषे दोषाचरालोलितकुतलचलद्धूलिपाल्याकुलाक्षे
घोषैकाधीश्वरी त्वत्सविधमुपगता वीक्ष्य च त्वां रुरोद।
गोपैर्हाहेति तावत् स तु दनुजवरस्त्वद्गुरुत्वेन प्रणश्य-
द्वेगस्त्वां मोक्तुकामोऽप्ययि भवति पपाताप्रमुञ्चत्यधस्तात्॥९॥

दुष्टे नष्टे पतित्वा कुहचिदपि गरिष्ठाश्मपृष्ठे स्थविष्ठे
हृष्टं त्वां ताडयन्तं तदुपरि करपद्मेन दृष्ट्वा स नन्दः।
वत्सं श्रीवत्सलक्ष्मा त्ववतु न इति सङ्कीर्त्य सङ्गृह्य चुम्बं-
स्तुष्टोऽदात् त्वज्जनन्यै स तु पवनपुराधीश मां पालयेथाः ॥१०॥

१४

संस्कारांस्ते विधातुं निभृतमुपगतं शौरिवाचा त्वदीयं
गेहं नन्दः स गर्गं प्रमुदितहृदयः पूजयित्वा बभाषे।
सूनोर्मे संस्कृतीस्त्वं कुरु मुनितिलकेत्येतदाकर्ण्य सोऽपि
प्रीतश्चक्रे परात्मन् रहसि तव तु नामादिकं साग्रजस्य ॥१॥

सत्तानन्दात्मतां वा वददिह कृषिधातोर्णकारस्य चैक्या-
दन्नायं कृष्णनामाकृत तव भुवनाघौघसङ्कर्षितां वा।
अन्वर्थान् नामभेदान् पुनरपि रचयन्नग्रजे राममुख्या-
स्तन्वन्नाख्या बभाषे मुरहर तव होराफलं तद्विदग्र्यः ॥२॥

ये ये स्नेहं भजन्ते व्रजप तव शिशौ ते न शोकं भजन्ते
ये द्रोहं ते न तोषं पुनरपि शृणु जेता द्विषामेष बालः ।
नेष्यत्यग्र्यं पदं स्वप्रियजनममलं श्रोष्यसि त्वं यशोऽस्ये-
त्यादि स्तुत्वा ययौ त्वां मुनिरथ पशुपैर्लालितस्त्वं व्यलासीः ।।३।।

कृष्ण त्वं धिष्ण्यभागे मृदुकृतभुजजानुप्रचारः सरामः
पुष्णन् वृद्धिं क्रमेण क्वचिदथ पदभूषारवाकर्णनेच्छुः ।
गच्छन् क्वापीषदुद्यद्दशनघृणिभरो भ्रष्टकेशो मुखाब्जे
मुष्णन् वृष्णीश चेतः परपुरुष नृणां जिष्णुबन्धो प्रपायाः ।।४।।

सामोदं संक्वणत्कङ्कणकुतुकरसाद्धावमानं नितान्तं
माता मध्ये पतन्तं वलितवदनमालोकयन्तं हसन्तम् ।
आदायालिङ्ग्य दोर्भ्यां स्रुतकुचभरमङ्के भवन्तं वहन्ती
गाढं स्तन्यं दिशन्ती जयति वदनमालोकयन्ती जगत्याम् ।।५।।

भूयः पद्भ्यां मृदुभ्यामरुणकमलभाभ्यां चरन् गोपगेहे-
ष्वारराच्छेकांश्च धावन् सबल इह भवान् गोपकैर्वारितोऽभूत् ।
भूमन् किं भूरिवाचा व्रजमिति विविधैर्मोदयन् केलिभेदै-
रादस्त्वं क्वापि नृत्यन् परिषदि नवनीतं वधूलोकदत्तम् ।।६।।

श्रुत्वा त्वद्गव्यमोषं कथितमथ वधूभिर्व्यथासङ्कुलाभि-
र्धृत्वा दण्डाय दण्डं प्रणयभरवशादक्षमा शिक्षणे सा ।
गोप्यः कोऽप्याधिरस्मात् परमयि न भवेन्नन्दनेनेति वाचा
माता ताः प्रीणयित्वा तव मुखविधुमाचुम्ब्य मग्ना सुधाब्धौ ।।७।।

बालैः क्रोधाकुलैस्त्वन्मुषितफलकुलैरेकदा त्वज्जनन्यै
प्रोक्ते मृद्भक्षणे तच्छ्रवणकुपितया प्रोचिषे त्वज्जनन्या ।
मृत्सां वत्स त्वमादः किल वद कुमते सत्यमित्थं ततस्त्वं
तत्सन्देहं प्रमार्ष्टुं सततविसृतशोभं मुखाब्जं व्यदारीः ॥८॥

सप्ताकूपारसप्ताचलयुतपृथिवीयुक्तसप्तद्विलोकान्
सप्तर्षीन् सप्तसप्तिप्रमुखगगनगान् सप्तमूर्धादिदेवान् ।
दृष्ट्वाम्बास्ये सुरारीन् नरझषपशुपक्ष्यादिसर्वं च विष्णुं
त्वात्मानं मोहमग्ना क्षणमथ भवतैवोद्धृतासीत् पुरेव ॥९॥

मथ्नत्यां जातु मातर्ययि दधि पपिवान् स्तन्यमेत्याङ्कमम्बा
मध्ये धर्तुं पयोऽगात्स्रुतमथ दहने जातरोषस्तदा त्वम् ।
भित्त्वा वेगेन मायामनुज दधिघटं मन्थदण्डेन यात-
श्छिद्रं मात्रात्र गत्वा दधि ततमवनावालुलोके नहि त्वम् ॥१०॥

दृष्ट्वा सोलूखलस्थं ददतमथ विलाळाय हैयङ्गवीनं
क्रुद्धा त्वां तत्र बद्ध्वा पुरमगमदतो निर्गतस्त्वं तदानीम् ।
भित्त्वेन्द्रद्रुद्वयं तत्कुहरतलसमुत्पातियक्षद्वयाया-
भीष्टं दत्त्वा प्रविष्टः पुरमव स तु मां कृष्ण वातालयेश ॥११॥

१५

नन्दाद्या जातु नन्दात्मज बत नितरां नाशहेतूनवेक्ष्या-
मन्दं वृन्दावनाख्यं किमपि वनमुपेत्यात्र वासं वितेनुः ।
वृन्दैः सत्राथ गोवर्धनममलतरापां कलिन्दात्मजां चा-
नन्दन् वीक्ष्यार्भकौघैः सह गृहमगमो देव पैत्रं दिनान्ते ॥१॥

गोवत्सान् चारयित्वा त्वयि चरति वने त्वेकदा गोपवत्सैः
साकं गोवत्सरूपः समपतदसुरः कोऽपि तन्मध्यदेशे ।
तावत् श्रीवत्सवत्स त्वमपि पदयुगं बिभ्रदुद्भ्रामयंस्तं
वेगादागत्य वृक्षे कुहचन हतवान् देव वत्सैर्नुतोऽभूः ॥२॥

पातुं पाथः प्रयाते सति तपनसुतायाः क्वचित्तोकजाते
कोपोष्मभ्यां खलारे कबलितवमितस्तीरगस्त्वं बकेन ।
जातस्फीतक्रुधा तं त्रुटितपृथुतरत्रोटियुग्मं निहत्या-
मोदाद् गोपालबालैः सह मृदु मुरलीं नादयन् गेहमागाः ॥३॥

साशस्त्वं काननाशे पशुपशिशुजनैः शाकशाल्यन्नहस्तैः
प्रातर्लोकेश यातोऽखिलपशुशिशुभिश्चावृतः काननाशाम् ।
यावत्तावद् दुराशः सुधृतशयुशरीरः शयानः सरण्या-
माशावांस्त्वद्वधेऽघोऽशनविधिमजितारब्धवानाशु बालैः ॥४॥

आज्ञायैतद् गते त्वय्यु रगगलबिलं स्फीतदेहे निरुद्ध-
श्वासो भूमौ लुठंस्त्वद्दलितगलतलस्सोऽपि नाशं गतोऽभूत् ।
तावत्तद्देहमध्योद्गतमहितमहस्संयुतः स्तूयमानो
देवैरादः स्वकैस्त्वं करधृतकबलं हासयन् नर्मवाग्भिः ॥५॥

मायानाथं भवन्तं भ्रमयितुमनसा वेधसा माययाथो
नीतान्यानेतुकामे त्वयि गतवति गोवत्सजालानि वेधाः ।
हीही गोपांश्च भुक्तान् कुहचिदपि तिरोधाय यातस्तदा त्वं
चासीर्गोवत्सगोपार्भकगवलमुरल्यादिशिक्यादिरूपः ॥६॥

भूयो मायोत्थवत्सादिभिरहरहराबद्धकौतूहलः सन्
क्रीडन् प्राग्वद्दिनान्ते निजपुरमगमः कोऽपि नाबोधि चैतत् ।
एवं वर्षे समाप्ते स तु कमलभवो नूतनान् प्राक्तनान् वा
गोवत्सान् गोपबालानपि च खलु विभो वीक्ष्य चिन्ताकुलोऽभूत् ॥७॥

तावत् तान् वत्सपालान् भुजविधृतगदाशङ्खपङ्केरुहारीन्
भूषापूर्णान् श्रिया लालितकरकमलान् सेवितान् शर्वमुख्यैः ।
भूमन् विष्णवाकृतींस्तत्पदकमलजुषं स्वं च सर्वत्र दृष्ट्वा
मोहं यातेऽब्जयोनौ करधृतकबलार्धस्त्वमेकोऽज दृष्टः ॥८॥

भूयस्त्वां वीतगर्वे स्तुवति नमति याते स्वधामाब्जयोनौ
देव त्वं चापि गोपैः सह मुदितमनाः प्राविशश्चात्मगेहम् ।
एवं बाल्ये व्यतीते सति पशुशिशुरक्षामनादृत्य भूमन्
गोत्रारक्षोत्सुकोऽभूरियमपि भवतो वासुदेवस्य युक्ता ॥९॥

श्रीदामोक्त्यैकदा त्वय्युपगतवति गोपैर्वनं धेनुकाख्यं
तालाङ्काधूततालप्रगलितफलमाध्वीं पिबत्याशु रामे ।
आयान्तं धेनुकाख्यं खरमभिहतवत्यस्य भृत्यांश्च यातो
गेहं तृप्तैर्वहद्भिः फलगणमनुगैः पाहि मां मारुतेश ॥१०॥

१६

कालिन्द्यप्सु स्वभागाशनकुपितपतत्त्रीशघातप्रभीते
शापोक्त्या सौभरेः कालियफणिनि गते वीशदुष्प्रापकासु ।
तीरे क्ष्वेळोष्मतप्तास्तरव इह पतन्त्यम्रतः पत्रिणोऽन्ता-
यातस्त्वं रामहीनः प्रवपुरुणतप्ता गवाद्यास्तदापः ॥१॥

नष्टासून् दृष्टिपातैरमृतरससमावर्षिभिर्गोपकादीन्
पुष्टासूंस्तदा कृत्वा सपदि फणिनमारात् करिष्यन् भवांश्च ।
पद्भ्यामारुह्य तीरस्थितशिखरिणमुत्प्लुत्य तस्मात् परात्मन्
मध्ये सूरात्मजायाः समपतदहिपक्ष्वेळदुष्टोदकायाः ॥२॥

यावद्विश्वम्भर त्वत्परिपतनचलोज्जृम्भिकल्लोलतोय-
व्यामज्जत्तीरबाणासनशतकसरित्तोऽहिरुत्पत्य घोरः ।
खादन्नापादचूडं सविषरदगणैः कष्टमावेष्टयत् त्वां
तावद् गोष्ठेऽनिमित्तेक्षणचकितधियस्तीरमपुर्बलाद्याः ॥३॥

स्वप्राणान् मोक्तुकामे सति निखिलजने सर्पबन्धाद्विमुक्तो
नृत्तं तन्मस्तकेष्वद्भुतमकृत भवान् हस्ततालाभिरामम् ।
तुष्टा गोपा मुनीन्द्रास्तुतुषुरथ सुराः पुष्पजालान्यवर्ष-
स्तद्वाहीन्द्रस्य जाया विमुमुचुरुदकं दृष्टितोऽत्यन्तखिन्नाः ॥४॥

त्वद्भूग्नाभुग्नभोगं स तु भुजगवरं तत्प्रियाभिर्नुतस्त्वं
गच्छाद्यैवाहिप त्वं रमणकमभयस्त्वत्कुटुम्बेन साकम् ।
इत्युक्त्वा तं तु मुक्त्वा फणिवरगृहिणीदत्तरत्नौघदीप्रः
क्षिप्रं गोपैः समेतः पुरमथ गतवान् सप्रमोदैर्दिनान्ते ॥५॥

भूयो घोरान्धकारैर्व्रजमखिलजनेऽप्यक्षमे गन्तुमद्य
त्वां कृत्वा मध्यभागे स्वपति दवशिखी व्यानशे हा समन्तात् ।
तावद् बुद्ध्वाधिकारानवितुमहह तान् दाववह्निं निपीया-
मोदादाश्लिष्यमाणः पुरमजित भवानाविशद् गोपसङ्घैः ॥६॥

काण्डीरैर्ज्ञातु भाण्डीरकवटनिकटं प्राप्य गोपैश्च गोभिः
प्रारब्धा द्वन्द्वयुद्धं सममथ विभजन् राममुख्यान् कुमारान् ।
तावद् दैत्यं प्रलम्बं धृतपशुपतनुं मानयंस्त्वद्बलाप्तं
यूथद्वय्या समाकल्पितजयिविहने बाहुयुद्धे रतोऽभूः ॥७॥

गोपाः केचिद्वहन्तस्तदनु रणमुखे वाह्यमानाश्च केचि-
ज्जाताः श्रीदामनाम्ना त्वमपि च विजितः कण्ठदेशेऽदधास्तम् ।
तावद्रामः प्रलम्बं गमयितुमनसं दूरतः स्वस्य वाहं
क्रोधाद्धत्वा खलं तं धृतनिजवपुषं प्राविशत् त्वां समोदम् ॥८॥

गोपौघे वीक्ष्य गास्तद्विहरणसमये दूरदूरं प्रयाता
भूयो गाढं विषण्णे त्वमपि च सह तैस्तत्खुरोद्धूतसृत्या ।
चारं चारं स मुञ्जावनतलमधिगम्यात्र दृष्ट्वा विषण्णा
गास्तत्पार्श्वं समागास्तदनु दवकृशानू रुरोधासमन्तात् ॥९॥

हा हास्मान् पाहि पाहीत्यजित विलपतो गोपकान् मीलिताक्षान्
वाचा ते हन्त भाण्डीरकवटनिकटं प्रापयित्वा पुनस्त्वम् ।
तीरे सूरात्मजायास्तपसमयमगो प्रावृषं शारदं तं
कालं प्रीतो ह्यनैषीर्वनभुवि स तु मां पाहि वातालयेश ॥१०॥

१७

गोप्यो गोविन्द रूपं तव सुभगतमं विश्वलोकाभिरामं
वीक्ष्यानङ्गान्धिता न क्षणमपि विरहं सेहिरे ते कृशाङ्ग्यः ।
यान्तं त्वां काननान्तं मुहुरपि सरसं लोकयन्त्यः क्वचित् ते
वेणुध्वाने श्रुते त्वद्गुणकथनपरा रेमिरे प्रत्यहं ताः ॥१॥

श्रीमन् देवेश गत्वा वनतलममले वृक्षमूलेऽथ तिष्ठन्
मोदाद् व्यत्यस्तपादं मृदुतरमुरलीं नादयन् सादरं त्वम् ।
तावन्मारेषुखिन्नास्त्रिदशयुवतयो निर्विकारा मृगाद्या-
श्चासन् कम्पेन हीनास्तरव उरुशिला विद्रुतास्तच्छ्रवेण ॥२॥

श्रुत्वा वेणुध्वनिं ते पशुपयुवतयो वेणुभुक्तावशेषं
लब्धुं बिम्बाधरापूरितममृतरसं सूरपुत्रीं समेत्य ।
तत्तीरे सैकतीं तां हिमगिरितनयामर्चिचंस्तद्व्रतान्ते
वस्त्राण्याधाय तीरे जलविहृतिरसासक्तचित्ता बभूवुः ॥३॥

तावद् भक्तार्तिहारिन् सरितमयि गतो बालिकानुग्रहार्थं
त्वां दृष्ट्वा लज्जया तास्ववनमितमुखीष्वाशु धृत्वाम्बरौघम् ।
तीरस्थं चातिरूढश्चलदलममलं पूरयन् वेणुनादं
मोदादेव न्यगादीरयि सुदृश इहागत्य धत्ताम्बराणि ॥४॥

त्वच्चित्तास्त्रास्तरुण्यो निजपटहरणेऽप्युत्सुका अप्यकाण्डा-
दत्यन्तं मोहमग्ना गिरमिति मृदुलामुक्तवत्यो भवन्तम् ।
कृष्ण त्वं देहि वस्त्राण्ययि तव चपलं युक्तमीदृङ् न कर्मा-
दः श्रुत्वादाः स्मितं त्वं गिरमपि कुरुतात्ताञ्जलेर्बन्धमित्थम् ॥५॥

तीरं चारुह्य तन्वीस्तदनु कृतवतीरञ्जलिं वीक्ष्य दत्वा
वासांसीत्थं न्यगादीरयि विदितमिहाकांक्षितं वः कृशाङ्ग्यः ।
तत् कालिन्दीतटं वक्ष्यति समुचितमथोत्तरं चन्द्रिकाभि-
र्युक्तं भूयः प्रयाते सति भवति ततो निर्गतास्ताश्च हृष्टाः ॥६॥

कारुण्याब्धे कदाचित् त्वयि गतमनसां विप्रपत्नीजनानां
कामं सम्पूरयिष्यन् सह निजसखिभिः सङ्गतो दूरदूरम् ।
कान्तारं तत्र तृष्णादिभिरतिविवशान् वीक्ष्य गोपालबालां-
स्तानन्धोयाचनार्थं प्रति यजनपरान् बाडवान् प्राहिणोस्त्वम् ।।७।।

विप्रानेत्यार्भकौघास्तव वचनमशेषं विभो ज्ञापयित्वा
कष्टं मूकत्वमाप्तैस्त्वयि खलु विमुखैर्धिक्कृतास्तैर्ययुस्त्वाम् ।
त्वद्वाचा ते पुनश्च द्विजकुलजनुषां धर्मदारान् प्रणम्य
त्वामुक्त्वा याचमानास्तदनु ययुरिमे स्वस्वहस्तैर्धृतान्नाः ।।८।।

एका भर्त्रा निरुद्धा तव पदमगमच्चिन्तयन्ती तदा त्वां
शेषास्त्वां न्यस्तबाहुं प्रियसखगलतस्सर्वलोकाभिरामम् ।
दृष्ट्वा भिस्सां ददुस्ते त्वमपि पुनरिमाश्चानुगृह्य प्रहिण्वन्
भुक्तो विप्रैर्नुतोऽभूः पुनरुदितमहत्तत्त्वबोधैः सदारैः ।।९।।

यागद्रव्यं कदाचित् पितृमुखभरितं वीक्ष्य मन्दं ह्यपृच्छ-
स्तातेदं किं क्रतोः साधनमखिलमिदं कस्य यागो मघोनः ।
को वार्थो वर्षणं तत् कुत इह भविता वर्षमाखण्डलात् त-
द्विङ् नो सत्यं स कार्यो बलिरचलवरायेत्यभाणीस्तदा त्वम् ।।१०।।

श्रुत्वैतन्नन्दमुख्यास्तव खलु वचनं युक्तियुक्तं बलिं तं
दत्त्वा गोत्राय तोषं पुपुषुरचलरूपस्तमश्नन् भवांश्च ।
इत्थं प्रोचे बलिं पश्यत गुरुमहिमानं गिरेरश्नतोऽस्ये-
त्युक्त्वा भूयोऽपि नेमुर्गिरिमवनिसुरांश्चाव मां मारुतेश ।।११।।

१८

श्रुत्वा वृत्रस्य शत्रुर्निजमखविहतिं दर्पपात्रः स्वपत्रं
क्रुद्धोऽत्रारुह्य तूर्णं करधृतशतकोटिः प्रहर्तुं प्रतस्थे ।
सत्रा पत्रीशपत्रं प्रलयजलधरैः सत्रभुङ् निस्त्रपस्त्वां
सत्रादामित्रलक्षव्रततिततिनिशातात्रदात्रं पवित्रम् ॥१॥

मेघौघैर्भीऽमरोषक्षुभितमतिसहस्राक्षसाहस्ररूक्षा-
क्ष्युत्क्षेपक्षारितोषर्बुधनिभतडिदाभोगनिर्घोषघोषे ।
धारासम्पातयुक्ते सति च विपुलवर्षोपलासारखिन्ने
गोपौघे पाहि पाहीत्यहह वदति मा बिभीतेत्यभाणीः ॥२॥

मूलादुन्मूल्य गोवर्धनमथ भवता प्रोद्धृते बाहुनास्मिन्
गोपा गोप्यश्च वाचा तव खलु पशवोऽपीयुरस्याश्वधस्तात् ।
विश्वात्मन्नद्रिधारी सह निजसखिभिर्नर्मवादी स्पृशन् गाः
पार्श्वस्था एकदोषाचल इति दिवसान् सप्त सन्तस्थिषे त्वम् ॥३॥

धत्तेऽयं वामहस्ते विपुलगिरिमिदं चित्रमित्थं जनौघे
सस्नेहं भाषमाणे विगलितजलजाले गते मेघजाले ।
वृत्राराती च भीत्या द्रवति सति बहिर्निर्गते गोपकौघे-
ऽप्यद्रेः कुक्षेर्निधायाधिकु गिरिमधिकं नन्दितोऽभूः स्वकैस्त्वम् ॥४॥

दृष्ट्वा दृष्ट्वा प्रभावांस्तव खलु नितरामुच्चकैर्गोपलोका
मत्वा त्वां विश्वनाथं तव जननफलं नन्दमेत्यान्वपृच्छन् ।
श्रुत्वा तत्प्रोक्तगर्गोदितमतिबहुमत्यावसंस्तत्र तावद्
गत्वा त्वां तत्त्वबोधात् ससुरभिरनमद्वृत्रहन्तास्तगर्वः ॥५॥

गोविन्दाख्याङ्कितं त्वां सुरभिरथ निजैरभ्यषिञ्चत् पयोभि-
र्देवेशश्चाभ्रकुम्भ्याहृतविमलमहद्दिव्यगङ्गापयोभिः ।
तावत् पूर्णे विभूत्या पशुपवरगृहे त्वत्प्रभावात् कदाचित्
स्नायन्तं यामुनाम्भस्यहरत जनकं वारुणः पूरुषस्ते ॥६॥

भूयस्ताते त्वया स्वं जलपतिपुरतो धाम नीते बभूवु-
र्गोपा विश्वेशबुद्ध्या त्वयि तव पदसन्दर्शने बद्धतृष्णाः ।
भूमंस्तावत् त्वया दर्शितममलपदं वीक्ष्य ते मोदपारा-
वारान्तः क्रीडमानाश्चिरमिदमत उत्तेरुरेतेऽनवेक्ष्य ॥७॥

गोपीनां मारबाणप्रदलितहृदयानां प्रभो साधयिष्यन्
कामं कामाभिरामः सकुतुकममलं यामुनं काननान्तम् ।
सान्द्रं चान्द्रेण धाम्ना शिशिरितयमुनासैकतं प्राप्य भूयो
वेणुं प्रापूरयस्त्वं मृदुतरनिनदाकृष्टलोकं सलीलम् ॥८॥

श्रीश त्वद्वंशशब्दं निशि शशधरमुख्यो निशम्याधिकाशा-
पाशावेशा हि रन्तुं विविशुरथ सकाशं निशान्तान्तरात् ते ।
पादं शुश्रूषयन्त्यः पशुपमृगदृशो जीवितेशस्य काश्चिद्
गेहे सक्ताश्च काश्चिच्छिशुषु च सकलं प्रोज्झ्य मोहाद् ययुस्त्वाम् ॥९॥

हारं काचिन्नितम्बे गलभुवि रशनां बिभ्रती विभ्रमेण
व्यामोहात् कापि गोपी कुचतटमपटीकृत्य चाटाटवीं ते ।
अन्यैकामञ्जनेन स्वदृशमथ लिखन्ती परापारयन्ती
गन्तुं त्वां ब्रह्म यान्ती मम च पदमदो देहि वातालयेश ॥१०॥

१९

भूमन् किं भूरिवाचा तव मृदुमुरलीनादपूर्णे स्वकर्णे
कामिन्यः कामुकान् स्वान् पितृजनतनयादीन् गृहाद्यं च मुक्त्वा ।
पद्भ्यां द्वाभ्यां मृदुभ्यामपि कठिनशिलाकण्टकाद्यैः सुदुर्गान्
मार्गानाक्रम्य वेगात् त्वयि गतमनसो देहतश्चागतास्त्वाम् ॥१॥

तावत् त्वामीश पिञ्छाञ्चितचिकुरभरं पञ्चमीचन्द्रफालं
चञ्चद्भ्रूयुग्ममत्यञ्चितमकरमणीकुण्डलं चञ्चलाक्षम् ।
किञ्चाताम्राधरं पूरितमृदुमुरलीवञ्चिताशेषलोकं
पञ्चेषोस्तेजसां वञ्चकमधिकमलोकन्त ताश्चञ्चलाक्ष्यः ॥२॥

कुन्देन्दूल्लासिमन्दस्मितशिशिरमहस्सञ्चयैस्तत्र नैशां-
श्चन्द्रांशूनेधयन्तं मधुरमुरलिकारन्ध्रलोलाङ्गुलीकम् ।
चन्द्रांशूल्लासिहारावलिलसितमुरस्युल्लसत्पीतचेलं
सुन्दर्यो व्यत्ययाकल्पितपदमनमन् नन्दज त्वाममन्दम् ॥३॥

हाहास्मान् पाहि पाहि ज्वलितमदनदावाग्निसन्तप्तमूर्ती-
र्वेगात् तावत्कबिम्बाधरभरितसुधावारिपूराभिवृष्ट्या ।
कालाम्भोदद्युते तापितनिखिलजगत्तापहारिन् हरे त्वं
नो चेत् तद्वह्निदग्धा व्रजमृगसुदृशो हन्त चेत्थं जगुस्ताः ॥४॥

कान्तानां कान्तमूर्ते परिधुतनिजकान्तादिकानां नितान्तं
क्लान्तानां कामभीष्मोष्मभिरधिकजवायानतः काननान्ते ।
श्रान्तानां तापशान्त्यै कृतमतिरपि सन्तापहारिन् हरे श्री-
कान्त त्वं दन्तकान्तद्युतिलसितमुखः प्रत्यभाणीः प्रतीपम् ॥५॥

कामिन्यः स्वागतं वः किमु गहनवने वेगतो धावनाद् वः
पादं किं किं क्षतं पङ्कजदलमृदुलं मोदितोऽहं कृशाङ्ग्यः ।
युष्माकं दर्शनेनाधिकसुकृतवतीनां जगत्सुन्दरीणां
युष्मद्दृत्यालपमात्रां त्वपि नहि मुदितो नन्दजोऽसौ भवामि ॥६॥

वामा हेयाः कथं वा स्वयमभिपतिताश्चाभिरामाः सकामा
वामा वामा मतिर्मे तदपि खलु सतीनां तु सङ्गप्रसङ्गे ।
या वामाः स्वप्रियाणां पदपरिचरणादौ प्रकामं विकामा-
श्चेमा वामाः पतेयुः परपुरुषसकामाश्चिरं नारकेषु ॥७॥

सश्रद्धं श्रूयतां मे वच इह सुदृशो निर्धनं निर्दयं वा
निष्कामं नर्मलापादिषु नयनविहीनं जळं वा विरूपम् ।
कान्तं क्लान्तं च साध्वी त्यजति नहि कदाचित्तदस्मात् समेत्या-
वासं स्वं स्वं प्रियान् स्वान् परिचरणमुखैः सादरं प्रीणयध्वम् ॥८॥

श्रुत्वा ते तत्तु वाक्यं मुखविधुगलितं तप्ततप्तास्तरुण्य-
स्तप्ताम्बवासिक्तसप्ताश्वकखरकरसन्तप्तमालत्यवस्थाः ।
त्रस्ता किं किं सुधांशोर्विषमविषझरोति क्षणं ता हृदन्तः
स्मृत्वा धृत्वा कथञ्चित् किमपि धृतिभरं प्रत्यवोचन् भवन्तम् ॥९॥

मा मेमाः कामसीमच्युतविषमशराघातसम्मुह्यमाना
वामा वामाक्षरैर्मोहय पुनरपि कामाभिरामातिकामाः ।
प्रेमाब्धे कामदे त्वय्यपि रमणमुखान् मामकान् प्रोज्झ्य याता-
श्चेमास्त्वामूचुरित्यादिकमव स तु मां कृष्ण वातालयेश ॥१०॥

२०

भूमन् भूयोऽपि गोप्यस्तव निरसनभीत्यैवमूचुर्भवन्तं
जीमूतः सन्त्यजेत् किं गणमतिविवशं चातकीनां स्वनाथम् ।
स्तोमं किं कैरवाणां स्वशरणमिह लोके तदीशः कलापो
हा मा मेमं जनं सन्त्यज बत पतयालुं हरे त्वत्पदाब्जे ॥१॥

यद्वद्यच्छत्यभीष्टं निजचरणजुषां भक्तबन्धुः स विष्णु-
स्तद्वन्नः काममापूरय सदय विभो तत् कृतं नो यदीमाः ।
मुक्त्वा कामज्वरार्ताः सुवपुरिदमशङ्कं परब्रह्मरूपं
युक्त्वा त्वां कृष्ण कामं वयमहह भवत्सङ्गरूपं भजेम ॥२॥

तावत् त्वं मेघकान्तिर्मुहुरिति विलपन्तीं च बाष्पं वमन्तीं
भूयस्त्वां लोकयन्तीं वदति किमयमित्यन्तरा निःश्वसन्तीम् ।
गाढं तापं वहन्तीं व्रजयुवतिततिं वीक्ष्य कारुण्यसान्द्रः
प्रारब्धाः कामिनीभिः सह विपिनतले कामलीलां विधातुम् ॥३॥

कालिन्दीतीरदेशे लसितशशिकरस्यन्दसंराजमाने
गोपीनामुत्तरीयैः कृतरतिशयने मोहने सन्निषण्णः ।
गोपीर्नर्मोक्तिसंस्पर्शनहसनमुखैश्चुम्बनैर्लेखनैर्वा
गाढाश्लेषैश्च सङ्गैः स्मररसजलधौ सारसाक्षीर्न्यमाङ्क्षीः ॥४॥

वस्त्राक्षेपादिनोज्जृम्भितमदनरसं विश्वलोकाभिरामं
वक्त्रेन्दूत्सर्पिमन्दस्मितशिशिररुचं बद्धघर्माम्बुलेशम् ।
यत् त्वामाश्लिष्य बिम्बाधरगलदमृतं तेऽन्वभूवन् यथेष्टं
दुष्प्रापं पङ्कजाक्ष्योऽमृतमिव भगवन् धन्यधन्यास्ततस्ताः ॥५॥

गोविन्दानन्दरूप त्वयि रमति भवत्प्रेयसीभिः समं ताः
प्रापुर्गर्वं महान्तं मयि मयि रमते माधवोऽयं ह्यमायम् ।
लावण्यं मे सुपूर्णं गुणगणपरिपूर्णाहमित्थं समस्ता-
स्तावत् त्वं राधयान्तर्दधिथ हृदि तदा हीनया दर्पदोषैः ॥६॥

वेगादन्तर्हिते त्वय्यथ विपिनतले घोषयोषावली स्व-
प्राणेशे विप्रयुक्ते शशिनि कुमुदिनीवाकुला दीनदीना ।
भूयस्त्वां मार्गयन्ती गहनगहनके मार्गितं वेदमार्गै-
र्मोहात् पृष्ट्वा च पृष्ट्वा तव तु तरुमुखान् वृत्तमित्थं चचार ॥७॥

दिष्ट्याशोक त्वया त्वत्किसलयमृदुपादः पुमान् किन्नु दृष्टः
कष्टं हा केतक त्वं किमु विपिनतलेऽलोकयः किं नु कृष्णम् ।
पुष्टः पूर्वं दयाभिः समधिकमधुना निष्ठुरैः कर्मभिः सं-
पुष्टो दृष्टः स चेत् त्वं वद पृथुलभवन्मञ्जरीपुष्टगन्धः ॥८॥

हन्तादर्शि त्वयारग्वध किमुत भवन्मञ्जरीमञ्जुविद्युत्-
कान्तिप्रोल्लासिपीताम्बरपरिलसितः कोऽपि वा कृष्णमेघः ।
किं मौनी वर्तसे त्व चलदल भवतालोकि किं कोऽपि मर्त्यः
किञ्चासौ त्वद्दलप्रोल्लसदुदरतलो मन्मनोधैर्यचोरः ॥९॥

भोभोस्त्वत्कुड्मलाभां जयति बत युवा बाहुमूलेन कोऽपि
क्रीडान्तःपातिनारीजननवनखरेखावता हे पलाश ।
किं किञ्चालोकयस्त्वं कुरबक भवतः पार्श्वमागात् समर्थः
किं वा त्वत्कोरकौघप्रतिभटरदसंशोभितः कोऽपि मर्त्यः ॥१०॥

पद्माक्षं पद्मिनि त्वं कमपि तरुणमालोकयः कानने किं
दृष्टः किं कोऽपि मर्त्यः कुवलय भवता त्वत्प्रभानीलकेशः ।
इत्थं चैतन्यहीनानपि शिखरिमुखान् प्रश्नयन्त्यो विचेरु-
श्चिरं त्वद्वृत्तमेताः स तु गुरुपवनागारनाथाव मां त्वम् ॥११॥

२१

एवं त्वां मार्गयन्त्यः पशुपयुवतयो यामुने चेष्टितं ते
तीरे भूयोऽनुचक्रुः किल तदनु तया राधयात्त प्रपेदे ।
गर्वात् त्वन्मुक्तयाथो वनभुवि च समं ताः समन्ताच्चिरं त्वा-
मन्विष्यावीक्ष्य चन्द्रेऽस्तमयति सरितस्तीरमापू रुदन्त्यः ॥१॥

हा हास्मान् प्रोज्झ्य यातः क्वचन बत भवान् पाहि पाहि प्रभो ते
देहं सन्दर्शय त्वं सरसपरचिदानन्दरूपं सुरूपम् ।
आश्वस्मभ्यं सुकेशं सुदृशमयि सुनासं सुगण्डं सुकण्ठं
सूरोबाहुं सुतुन्दं सुकटिमथ सुसक्थं सुजानुं सुपादम् ॥२॥

कारुण्याब्धे त्वमेना मुहुरिति विलपन्तीश्च सङ्कीर्तयन्ती-
स्तावत्कान् सद्गुणौघान् दृढतरमयि सम्भावयन्तीर्विभो ते ।
गात्रं लावण्यपात्रं विमलतरहृदा स्फीतभक्तीर्निरीक्ष्य
प्रादुर्भूतस्तदग्रे स्मितरुचिविलसद्वक्त्रचन्द्रस्तदानीम् ॥३॥

दृष्ट्वैतास्त्वां पुरस्तान्मृदुतरविशदस्मेरसान्द्राननाब्जं
लब्ध्वा जीवं परेताः स्वमिव रभसमुत्थाय गत्वा भवन्तम् ।
चक्रुः किं किं न मोदादयि भवति विभो कापि गोपी कराब्जं
धृत्वा ते सन्निधाय स्वककुचकलशे हृष्टरोमा बभूव ॥४॥

अन्या धन्यान्यबाहुं निजगलभुवि ते वेष्टयन्ती तदानीं
धन्यं रोद्धुं स्वकीयं किमिव गलतलोत्सर्पिणं प्राणवायुम् ।
अन्यां धन्यां रिरंसुं सुदृशमयि गतं मां विधूयातिखिन्नां
वन्यां का वा स्पृशेत् त्वां परुषमिति सुदूरे स्थितान्या ददर्श ।।५।।

कृष्ण त्वं मे क्व मुष्णन् कितव हृदगमः शिक्षणीयो हि चोर-
स्तिष्ठेत्युक्त्वास्रजाते भुजयुगमकरोद् बद्धमन्यातिधन्या ।
निर्ह्रीः संगृह्य वक्त्रात् तव किल तरुणी कापि ताम्बूलपूगं
निक्षिप्य स्वे मुखाब्जे मुदमभजदतीवाकुला प्रेमभारैः ।।६।।

श्रुत्वा तासां वचस्त्वं प्रणयकलहसान्द्रं रसार्द्रं समस्तं
दृष्ट्वा तन्नर्मकर्म प्रणयरसभरापुष्टचेतास्तदानीम् ।
प्रत्येकं सारसाक्षीः सरससरसमालक्ष्य संश्लिष्य चुम्ब-
स्तुष्टः सप्ताश्वपुत्रीतटनिकटमगाः साकमाभिः प्रियाभिः ।।७।।

उत्तुङ्गोरोजवस्त्रैर्विरचितशयने सन्निषण्णं भवन्तं
मुग्धाङ्ग्यः प्रोचुरित्थं सुवदन करुणा कीदृशी मादृशीषु ।
केचित् सर्वत्र केचिच्छरणमुपगतेष्वात्तकारुण्यसारा
लोके खल्वीदृशाः स्युः कतिचिदिति निशम्येत्यभाणीस्तदा त्वम् ।।८।।

मा मा नीलारविन्दच्छदरुचिरदृशः प्रेमभाराकुलेऽस्मिन्
काठिन्यं शङ्कयतां मय्ययि मयि मनसो वोऽनुवृत्त्यै मयेदम् ।
लोलापाङ्ग्यः कृतं तत्पुनरपि शृणुतास्मत्प्रिया भक्तबन्धो-
र्यत् प्रेमास्याप्रमेयं भवति मम तु युष्मासु तत् सन्निधानम् ।।९।।

तस्मात् पद्मायताक्ष्यो विहरत विरहातङ्कहीनं निशासु
स्निग्धास्वब्जप्रभाभिस्त्विति तव वचसा मोदभाराकुलाभिः ।
स्निग्धाभिः कामिनीभिः सह विपिनतले रासलीलां विधातुं
पश्चादारब्धवांस्त्व स तु पवनपुराधीश मां पालयेथाः ॥१०॥

२२

श्रीश श्रीकेशपाशातुरितशिखिशिखाशेखरैः शोभमानं
श्रीमद्बालेन्दुफाले विलसिततिलकं नीललोलालकास्यम् ।
श्रीमद्गण्डोज्ज्वलत्कुण्डलमुरसि लसत्तारहारप्रतानं
श्रीमत्पीताम्बरावेष्टितमनुकलये रासलीलाकुलं त्वाम् ॥१॥

तावत् स्त्रीमण्डलेऽत्युज्ज्वलकटकमुखैर्मण्डनैर्मण्डिताङ्गे
गाढं बद्ध्वा पटेन स्तनकलशभरं मण्डलाकारसंस्थे ।
हेमाभाशेषगोपीयुगलमिह चरन्नन्तरा तप्तहेम्नां
मालान्तस्स्यूतनीलोपल इव भगवन् लेसिथानेकरूपः ॥२॥

श्रुत्वैतां रासकेलिं रसभरललितां नारदाद् देवपाली
तत्केल्यालोकनोद्यद्बहलरसमहेलालिभिः प्रज्वलन्ती ।
पुष्टामोदं समागाद्दिवि ललितमुखव्रीलिताब्जप्रभाभिः
क्षिप्रं सन्मण्डनामण्डितनिजतनुभिर्बद्धहेलाभिदाभिः ॥३॥

तावत् त्वत्पाणितालप्रमिलितपदपाते चलत्पादभूषा-
नादापुष्टे क्वणत्कङ्कणकटकमुखोद्यज्झणत्कारजुष्टे ।
स्थानभ्रष्टकेशप्रगलितसुममाले वलद्धारजाले
चार्वंसालम्बिकस्तारुणकरकमले श्रोणिलोलद्दुकूले ॥४॥

रासक्रीडोत्सवेऽस्मिन् विलसति विचलत्कुण्डलोल्लासिगण्ड-
व्याबद्धस्वेदलेशे कलरवमुरलीनादसम्पूरिताशे ।
देवाः सम्मुच्य देवेश्वर सुमनिचयं मोदमग्नाः सयोषा
आसन् वित्तार्पिताङ्गा इव विगतमनोवृत्तयस्त्वन्निलीनाः ॥५॥

कान्ता गोपालकान्ता चिरविहरणतान्ता निमीलद्दृगन्ता
कान्तेऽसान्तेऽब्दकान्ते श्रमजलरुचिरा कापि लीना परं ते ।
काचित् ते चञ्चलाक्षी भुजजलजमरं सञ्चुचुम्ब प्रमोद-
प्रोद्यद्रोमाञ्चदेहाञ्चितमतिविवशा मीनकेतोर्विहारैः ॥६॥

गण्डं गण्डे निधाय स्वकमथ विलसत्कुण्डले तावके का-
प्यर्णोजाक्ष्यापिबत् त्वन्मुखभृतममृतं नागवल्लीदलोत्थम् ।
अर्णोजाक्षातिवाचा किमु भवति परब्रह्मरूपे प्रमोदात्
तन्वङ्ग्यः किन्न चक्रुः पुरुसुकृतवशाद्धन्यधन्या ध्रुवं ताः ॥७॥

प्रायो गीते च वाद्येऽपि च बत विरते केवलं बालिकानां
लोको लोकैकबन्धो परिषदि नटनं मोदमत्तो व्यतानीत् ।
नाजानादेष नीवीं किमपि च गलितां कुन्तलीं कञ्चुलीं च
ज्योतिश्चक्रं च जातं किल दिवि सविलम्बं परं किं ब्रुवेऽतः ॥८॥

आनन्दाब्धौ निमज्ज्याजित निखिलजगद्रासलीलां समाप्या-
लोलापाङ्गीः पुनश्च स्मरशरविषमाङ्गीस्त्वदास्याब्जभृङ्गीः ।
तन्वङ्गीर्मञ्जुलाङ्गीः पुरुसुकृतवतीः स्वेदसम्मिश्रिताङ्गी-
र्धन्यात्मन्नङ्गसङ्गैः पुनरपि सुदतीर्मोदयामासिथ त्वम् ॥९॥

कालाम्भोदाभिरामः पुनरपि च महेलालिभिर्लालिताभिः
कालिन्द्यां केलिभेदैः खलु परिमिलितश्चारु केलिं व्यधास्त्वम् ।
कान्तारान्ते च कान्ताजनशतसहितः कान्तमूर्ते नितान्तं
कान्ते शान्तानिलैस्त्वं परिमलसुमकान्ते व्यालासीः सलीलम् ।।१०।

अम्भोजाक्षीरिति त्वं निशि निशि भगवन् संभृतात्यन्तरागाः
सम्प्रीतः काननान्ते पुरुसुकृतवतीः सम्मदाख्ये कृपाब्धे ।
अम्भोराशौ निमज्ज्याजित पुनरपि चोद्धृत्य तस्मात् पुनश्चा-
प्येवं केलिं वितन्वन् गुरुपवनपुराधीश मां च प्रपायाः ।।११।।

२३

एवं लीलाकुले त्वय्ययि युवतिजनैरम्बिकाकाननान्तं
गोपाः प्राप्याम्बिकेशोत्सवमजित निषेव्यास्वपन्नत्र रात्रौ ।
तावत् कश्चिद् भुजङ्गस्तव जनकममुं संदशन् गोपघातै-
र्नो मुञ्चन् स्पृष्टमात्रस्तदनु तव पदा रूपमाप स्वकीयम् ।।१।।

भूमन् विद्याधरोऽहं मुनिवचनबलाद् वाहसात्मा बभूव
प्राग्वेदानीमहो ते पदकमलपरिस्पर्शनाच्छोभनात्मा ।
एवं स्तुत्वा च नत्वा गतवति खचरे नन्दगोपादिगोपै-
र्मोदादाश्लिष्यमाणः पुरमगमदतो मोहनात्मा भवांश्च ।। ।।

भूयो रामेण युक्ते त्वयि रमति(?) वने स्त्रीजनैर्वल्लवीस्ता
दूरान्निन्ये खलात्मा धनदसहचरः शङ्खचूडस्ततस्त्वम् ।
तासां श्रुत्वा विलापं सपदि खलममुं प्राप्य हत्वाग्रजाय
प्रादास्तन्मौलिरत्नं तदनु पुरमगाः प्रेयसीभिः समेतः ।।३।।

भद्रात्मानं भवन्तं भवनमुपगतं तावकीनं निहन्तुं
भद्रात्मानं भयोनं भृतकवरमरिष्टाभिधं भोजभर्तुः ।
हत्वाभद्रं सुभद्रं जगति बहुलमापूरयन् भद्रमूर्ते
भद्रं मे देहि भद्रावरज भवभयातीतमानन्दसान्द्रम् ।।४।।

विश्वेश त्वत्सकाशं पिशितभुगुपविश्याश्वरूपः स केशी
विश्वं निर्घातघोरैः सकलमपि परिक्षोभयन् शब्दभेदैः ।
विश्वासी भोजवंशेशितुरधिकमशेषेशितुस्ते भुजान्त-
श्चिक्षेपाङ्घ्रिं तदा तं निजपदमनयो निर्दयं मर्दयंस्त्वम् ।।५।।

देवेशाद्यास्तदानीं प्रमुदितहृदया देव देवेश्वरं त्वां
देवाः सम्मुक्तदेवद्रुमसुमनिचयास्तुष्टुवुः केशवाख्यम् ।
तावत् तुष्टाव वीणाधरमुनिरपि ते वासुदेत्वमुक्त्वा
भोजेन्द्रायाथ चैनं पितृवधनिरतं वारयंस्त्वां प्रयातः ।।६।।

गोपैर्नैलायनक्रीडनविधिनिरते त्वय्यटव्यां कदाचिद्
व्योमाख्यो व्योमचारिप्रमथनकुशलः कोऽपि दैत्यः समेत्य ।
गोपांश्चोरायितो गा अपि खलु पिदधे प्रापयित्वा गुहासु
द्वाराण्यासां दृषद्भिस्तदनु स भवताज्ञाय चेदं हतोऽभूत् ।।७।।

कंसस्त्वां नारदोक्त्या व्रजभुवि निवसन्तं समाकर्ण्य दीर्ण-
स्वान्तस्तूर्णं प्रहिण्वन् गुणगणपरिपूर्णं ततो गान्दिनेयम् ।
आनेतुं धन्वयागच्छलत इह भवन्तं ततस्त्वद्विलोक-
प्रोद्यद्भूरिप्रलोभः स च मुदमभजद् भक्तवर्योऽप्रमेयाम् ।।८।।

गच्छन् सोऽप्यच्युत त्वां पथि महितरथेनाथ चिन्तां वितन्व-
त्रित्थं द्रक्ष्यामि किं तं परपुरुषपरीरम्भमाहो भजेयम् ।
किं वा वक्ष्यत्ययं मामिति सरणिमतिक्रम्य वृन्दावनस्थो
नन्दस्त्वत्पादमुद्राङ्कितभुवि विलुठन् मूर्ध्न्यधात् तद्रजांसि ॥९॥

भूयः सायं स गोपालयचयममलं वीक्ष्य हृष्टः प्रविष्टो
गेहं तेऽलोकयत् त्वां बलमपि च गवां दोहनालोकलोलम् ।
सायंस्नानाभिरम्यं धृतशितिवसनं पीतचेलं दधानं
स्मेरास्यं भूषणैर्भूषितनिजवपुषं लौकिकैर्लोकरम्यम ॥१०॥

दूरादेवावतीर्णं मणिमयरथतस्त्वां नमन्तं सरामो
गाढं संश्लिष्य पाणि दधदजित भवान् प्रापयन् गेहमेनम् ।
मोदात् सम्पूज्य पित्रा सह सखिषु समावेद्य सन्देशमेतत्-
प्रोक्तं राज्ञोऽस्वपत् तन्निशि पवनपुराधीश संरक्ष मां त्वम् ॥११॥

२४

श्रुत्वा ते यानवार्तां तदसहनतया गाढमार्ता विलापं
चक्रुर्गोप्यः किमेतत् कथमिव विसृजेन्नन्दजोऽस्मान् कृपालुः ।
किं दैवं चैवमासीदिह खलु बत नः किन्नु कुर्मः पतित्वा
किं वह्नौ किन्नु पीत्वा विषमसव उपेक्ष्या इहेत्यादिकं ताः ॥१॥

प्रातः प्रस्थातुकामः शमयितुमतुलं तापमासां व्यमुञ्चः
श्रीमंस्त्वं गान्दिनेयं तदनु स सुदृशः सान्त्वयंस्त्वद्वचोभिः ।
वेगादायामि युष्मत्सविधमयि भवेत् सङ्गमश्रीर्मयैवे-
त्येवंरूपैस्ततस्त्वं पितृमुखपशुपालान्वितोऽगाः सरामः ॥२॥

गेहात् त्वय्याशु गोपीजनविमलमनोभिः शताङ्गेन गोपा-
नोभिश्चानुप्रयाते गतवति यमुनां तज्जले गान्दिनेयः ।
स्नायंस्त्वां तत्र दृष्ट्वा त्रिदशनतिरथोन्मज्ज्य दृष्ट्वा रथेऽपि
प्रीतो मज्जन् जलान्तः पुनरपि परमं पूरुषं त्वां ददर्श ।।३।।
स्तुत्वा त्वां तत्र दृष्ट करकलितगदाशङ्खपङ्केरुहारिं
भक्त्या भोगीन्द्रभोगोपरि परिलसितं सच्चिदानन्दरूपम् ।
मग्नः कैवल्यसिन्धौ चिरतरमविलोक्याथ रोमाञ्चिताङ्गः
क्षिप्रं प्रापद्भवन्तं पुरुसुकृतनिधिर्विस्मितः सस्मितास्यम् ।।४।।
मध्याह्ने त्वं वयस्यैः सह लघु मधुरामाविशन्नत्र भुक्त्वा
कुत्राप्यारामदेशे कृतवसतिरतो निर्गतो राजमार्गम् ।
गत्वा तत्रस्थनारीजननयनसमापीतसौन्दर्यसारः
कृत्वा मोदं महान्तं जनहृदि भगवंश्चेरिथ त्वं कटाक्षैः ।।५।।
दृष्ट्वा कञ्चित् कठोरं रजकमथ पटीं प्रार्थयन् धिक्कृतोऽस्य
क्रुद्धः शीर्षं विभिन्दन् गतिमपि ददिवान् धन्यधन्यां परात्मन् ।
सश्रद्धं वेषयोग्यं तव खलु ददतं वायकं वीतदोषं
तुष्टः सम्प्रापयंस्त्वं निजपदममलं मालिकाग्रं समागाः ।।६।।
मालाभिर्मानितस्त्वं बहुनुतिवचनैश्चापि मालाकृतास्य
प्रादा भक्तिं वरिष्ठां गतिमपि विचरन् प्राप्य कुब्जां सलीलम् ।
लिप्त्वाङ्गेष्वङ्गरागं सकुतुकमनया दत्तमेनां गृहीत्वा
हस्ताभ्यामुन्निनेथ त्वमियमपि जगत्सुन्दरी सम्बभूव ।।७।।

भूमंस्त्वत्सङ्गमोत्कां पुनरुपगतिवाचा विमुञ्चन् मृगाक्षी-
माविष्टोऽत्यन्तकोलाहलमुखरितदिक्चक्रवालां पुरीं त्वम् ।
यातः कोदण्डशालां वरधनुरमलं पूजितं हन्त गृह्णन्
वेगादारोपयिष्यन् स्तनितनिभरवाघूर्णिताशं ह्यभाङ्क्षीः ॥८॥

श्रुत्वा त्वद्ध्वस्तचापध्वनिमथ जहृषुर्निर्जरा भोजराज-
स्त्रस्तोऽभूद्रक्षिवृन्दं त्वमपि च धनुषः खण्डयुग्मेन पिष्ट्वा ।
दृष्टः शिष्टैश्च दुष्टैरपि खलु सरसं जातकम्पश्च भूयः
पश्यन् लक्ष्मीं पुरस्याजित सह सखिभिर्वाटिकां सायमागाः ॥९॥

वाचा राज्ञः प्रभाते सति बहुविधवाद्यानि घुष्यत्सु मल्ले-
ष्वासीने मञ्चमध्येष्ववनिपनिवहे हर्म्यगे नन्दगोपे ।
कंसे सौधं प्रविष्टे त्वमपि कुवलयापीडनागेन्द्ररुद्धं
रङ्गद्वारं गतोऽभूर्बलमुखसहितः पाहि मां मारुतेश ॥१०॥

२५

हस्त्यारोहप्रणोदप्रकुपितमदहस्तीन्द्रहस्ताग्रकृष्टः
क्षिप्तस्तेनोर्ध्वदेशं यदभुवि पतितः कुम्भमाहत्य तस्य ।
प्रक्रीडन् पुच्छमाकृष्य च भुवि बत तं पातयित्वास्य दन्ता-
वुद्धृत्य त्वं सजीवं सकुतुकमगमः साग्रजो रङ्गदेशम् ॥१॥

दन्तं स्कन्धे दधानं जलधरपटलीकान्तिकान्ताङ्गशोभा-
सङ्कृष्टस्वान्तनेत्राः खलु सकलजनाः साग्रजं त्वां विलोक्य ।
सन्तुष्टा मेनिरे ते पुरुसुकृतनिधिं स्वं स्वमात्मानमद्धा
सङ्क्रुद्धौ मल्लवीरौ तदनु नृपगिरा योद्धुमाप्तौ भवन्तौ ॥२॥

चाणूरेणाभियुध्यन् झटझटिति मिथो निष्ठुरैर्मुष्टिघातैः
पातैरुत्थापनोद्भ्रामणहननसमाकर्षणैर्बन्धमोक्षैः ।
एवं नानाविधं त्वं रणमिह कृतवान् मुष्टिकेनापि रामो
लोकास्तत् प्रेक्ष्य गन्तुं ह्यनुचितमृधमारब्धवन्तस्तदानीम् ॥३॥

तावच्चाणूरमेनं करकमलपरिभ्रामणभ्रष्टजीवं
भूमौ सम्पातयामासिथ स च हलिना मुष्टिकोऽभूद्विनष्टः ।
तावद् दुष्टैर्दधावे द्रुतमथ भयतो नष्टशिष्टैस्ततोऽसौ
भोजेन्द्रो रुद्धतूर्यः समशिषदजिताहन्तुमार्यान् पितॄंस्तान् ॥४॥

सर्वव्यापिन् भवन्तं गमयितुमनसं दूरतो भोजराजं
सौधस्थं चोत्पतंस्त्वं प्रसभमजित संगृह्य सम्मर्द्य गाढम् ।
भूमौ तं पातयित्वा तदुपरि पतितोऽभूस्तवोपर्यपि स्व-
र्वास्युन्मुक्तः सुमौघः स च नृपतिरगाद्धीतियोगेन मुक्तिम् ॥५॥

पिष्ट्वा भ्रातृाष्टकं त्वं पुनरपि नृपतेस्तातमाप्तः सदारं
नत्वा कृत्वोग्रसेनं नृपमजित यदून् मोदयन् कामदानैः ।
दत्त्वा नानाविधार्थं व्रजमथ विसृजन् नन्दमुख्यान् सखायं
भक्तं लब्ध्वोद्धवं तं प्रमुदितहृदयस्तत्र पुर्यां न्यवात्सीः ॥६॥

गत्वा सान्दीपनिं तं कतिपयदिवसैः सर्वविच्चापि सर्वा
विद्याः संगृह्य तस्मै त्वमथ सबलो दक्षिणार्थं कृतान्तात् ।
दत्त्वा नीतं तनूजं सरसि मृतमितो नादयन् पाञ्चजन्यं
धिष्ण्यं कारुण्यभारैर्विवशहृदहिनोरुद्धवं गोपिकासु ॥७॥

गत्वायं सायमार्यस्तव चरितसुधासारपूर्णं व्रज त्वद्-
वृत्तान्तैर्मुक्तबाष्पं भृशमथ रमयामास नन्दं सदारम् ।
दृष्ट्वा प्रातस्तरुण्यो मणिमयरथमायानमाशङ्क्य तेऽद्धा
त्यक्त्वा कृत्यानि गत्वा व्रजपतिगृहमालोक्य चैनं तमूचुः ॥८॥

श्रीमन् पित्रोर्हितार्थं त्वमिह किमधुना प्रेषितो निष्कृपेण
क्वासौ हा पौरनारीजनहितनिरतः कान्त हा हा प्रपायाः ।
आलापाश्लेषसङ्गादिषु परमसुखं ज्ञापयित्वा पुराब्धौ
मोदाख्ये पातयामासिथ विरहमहावह्निमध्येऽधुना नः ॥९॥

रासक्रीडाविलोलं च्युतचिकुरभरं स्वेदलेशैर्मनोज्ञं
रूपं सन्दर्शय त्वं सकृदपि च समालिङ्गितुं दीनबन्धो ।
उक्त्वैवं निःश्वसन्त्यो मुहुरपि विलपन्त्योऽन्तरा चिन्तयन्त्य-
स्त्वद्वृत्तान्तं वमन्त्यो नयनयुगलतोऽश्रूणि ता मोहमापुः ॥१०॥

एष्यामि द्रागिदानीं मदनुपगमनं केवलं कार्यभारा-
न्मामा शोकाग्निमग्ना भवत विरहतस्तापहा वोऽहमस्मि ।
एवं विज्ञानसारैरपि तव वचनैः सान्त्वयंस्ताश्च राधां
सोऽगात् तद्भक्तिभूम्ना जनितबहुमतिस्त्वां मरुन्नाथ पायाः ॥११॥

२६

सैरन्ध्र्याः प्राप्य वासं स्मरविवशमतेः सोद्धवोऽत्रागतिं ते
ध्यायन्त्याः सर्वदा तां भृशमथ रमयामासिथ त्वं यथेष्टम् ।
भूयः पृष्टा वरं त्वन्निधुवनमवृणोत् सा पुनश्चाथ तस्यै
ज्ञातज्ञेयं सुरर्षेर्ददिथ सुतमुपश्लोकसंज्ञं रमंस्त्वम् (?) ॥१॥

अक्रूरावासमेत्योद्धवबलसहितोऽभ्यर्थितः सादरं त्वं
भक्तेनानेन चैनं पुनरथ विसृजन् हस्तिनं पाण्डवानाम् ।
वृत्तं वन्यागतानां कुसृतिमपि च वैचित्रवीर्यात्मजानां
ज्ञात्वा पुर्यां न्यवात्सीस्तदनु मगधपश्चुक्षुभे कंसघातात् ॥२॥

रुन्धानेऽस्मिन् रुषान्धे खलहृदि मधुरां स्वीयजामातृघाता-
च्छक्राल्लब्ध्वा रथादीन् कतिपयबलशाली भवान् रामशाली ।
हत्वा नीतां त्रयोविंशतिमधिकरुषाक्षौहिणीं तेन भूयो
बद्धं रामेण रोषात् पुनरपि बलमानेतुमेनं व्यमुञ्चत् ॥३॥

दुष्टोऽयं पुष्टरोषः पुनरपि च पुरेवारुणत् त्वां चमूभि-
र्दुष्टारातेः सरामः समहरदखिलांस्तद्बलौघान् भवांश्च ।
इत्थं चाक्षौहिणीषु त्रिशतयुतनवत्येकसंख्यासु नष्टा-
स्वस्यात्रात्यष्टियुद्धैर्यवनपतिरगान्म्लेच्छकोटित्रयेण ॥४॥

त्वद्वाचा त्वष्टृसृष्टे निजजनमखिलं पत्तने सिन्धुमध्ये
नीत्वा त्वं योगशक्त्या तदनु यवनपेनानुयातः प्रधावन् ।
भीत्येवाग्रे तिरोभूरयमपि मुचुकुन्देन पादाहतेन
प्लुष्टः सुप्तेन तत्र त्वमपि नरपतेराविरासीः पुरस्तात् ॥५॥

दृष्ट्वा त्वां दिव्यभूषायुधलसिततनुं निःस्पृहायान्यवस्तु-
ष्विक्ष्वाकूत्थाय नानानुतिवचनपरायाथ भक्तिं वरिष्ठाम् ।
दत्त्वा मुक्तिं च गत्वा पुनरपि मधुरां तत्र सैन्यानि हत्वा
रुद्धः सैन्यैः पुरेवाध्वनि मगधनृपेणाद्रवो भीरुवत् त्वम् ॥६॥

गत्वा त्वं विश्वकर्मप्रकटितबहुवैचित्र्यमत्राब्धिमध्ये
शक्राद्यैर्दत्तसम्पत्समुदयमखिलं तत्पुरं द्वारकाख्यम् ।
तत्र स्वैरं न्यवात्सीस्तदनु ददुषि रामाय वाचा विधातुः
पुत्रीं स्वां रेवते क्ष्माभृति समजनि तद्घोषपूर्णा पुरी ते ॥७॥

श्रुत्वा श्रुत्वा गुणांस्ते त्वयि खलु नितरां रागभारं वहन्ती
ज्ञात्वा चैद्यप्रदानोद्यममथ सुमुखी रुक्मिणो रुक्मिणी सा ।
पुत्री भीमस्य तप्ता द्विजवरमहिनोत् त्वां समाख्यातुमेतद्
गत्वा त्वद्धाम विप्रोऽप्ययमथ भवतैवाच्युताभ्यर्चितोऽभूत् ॥८॥

ऊचे त्वामेवमस्या गिरमयमहमेषाहृता त्वद्गुणैः प्राक्
चेदीशो हर्तुमिच्छन् किल सहजगिरा वर्तते श्वः खलो माम् ।
नाथ त्वं मां प्रपायाः सकरुण यदि मां सन्त्यजेः सन्त्यजेयं
जीवं मे नात्र शङ्केत्यथ निजमवदः कामतापं तदुत्थम् ॥९॥

तुष्टेनानेन भूयो रथवरमधिरुह्याविशन् कुण्डिनाख्यं
ज्येष्ठाद्यैश्चानुयातः क्षितिपतिकृतपूजोऽवसः सा च विप्रात् ।
श्रुत्वा त्वद्यानमत्र प्रमुदितहृदया निर्गतायां निशायां
गत्वोमां तां च नत्वा वरमथ सुदती त्वत्पतित्वं ययाचे ॥१०॥

आलीमध्ये लसन्तीं गिरिदुहितृगृहादागतां तां नृपाणा-
माली वीक्ष्याङ्गजार्त्या पारषदि विकृतिं हन्त कां कां न भेजे ।
तावत् त्वं गच्छसि त्वं क्व नु सुमुखि वदेत्याशु तामेत्य गृह्णन्
पाणिं यानेऽधिरोप्याहितरणमजयोऽत्रानुगः क्ष्माभृदोघम् ॥११॥

युद्धे त्वं हन्तुमिच्छन्नपि सुतनुगिरा रुक्मिणं तं विरूपं
कृत्वा मुक्त्वा च गत्वा पुरमथ सुदृशं लालयन्नेकदास्याः ।
चित्तं संशोध्य वक्रोक्तिभिरतिमधुरं चाधरं वल्लभायाः
पीत्वा पीत्वा कुचान्ते कृतशयन हरे मारुताधीश पायाः ॥१२॥

२७

अर्काल्लब्धं कदाचिन्मणिमथ भवता याचितं तेऽवितीर्णं
सत्राजित् स्वं स्यमन्तं क्वचिदहनि ददौ स्वानुजे मण्डनार्थम् ।
धृत्वैनं स्कन्धदेशे स च खलु मृगयां प्राप मांसभ्रमात्त-
द्रत्नेऽहंस्तं प्रसेनं हरिरमुमवधीज्जाम्बवानात्तरत्नः ॥१॥

लोकास्त्वां लोकनाथं मणिहरमनुसृत्याथ सत्राजिदुक्तिं
प्रोचुः कष्टं ततस्त्वं निजजनसहितोऽन्विष्य दृष्ट्वा प्रसेनम् ।
कान्तारान्ते मृतं तं हरिमपि कपिपादाङ्कितेनाध्वना तं
यातोऽभूर्जाम्बवन्तं व्यजनि च समरश्चाष्टविंशत्यहान्तम् ॥२॥

बुद्ध्वा तेनाथ दत्तां सुदृशमपि मणिं संप्रगृह्यानुगृह्णन्
वृद्धं सत्राजितेऽदा मणिमथ ददिवान् सोऽपि रत्नेन साकम् ।
तुभ्यं भामां स्वपुत्रीं भुवनजनमनोमोहिनीं लज्जितात्मा
लक्ष्यं प्राप्य प्रहृष्यन् गहनमतिरदास्तं मणिं तस्य च त्वम् ॥३॥

स्निग्धां तां सत्यभामां रमयति भवति प्लोषवार्तां तदन्ते
श्रुत्वाहो पाण्डवानां गतवति च कुरून् गान्दिनेयादिवाचा ।
हत्वा सत्राजितं तं शतधनुरहरद्रत्नमत्रातिखेदाद्
दृष्ट्वा भामां गतां त्वां शतधनुमवधीः सा च हृष्टा तदासीत् ॥४॥

रत्ने शङ्कीव रामः पुनरथ मिथिलामाविशन् शिक्षयित्वा
तं कौरव्यं गदायां तव पुरमगमत् त्वद्द्वयेनाथ यातम् ।
अक्रूरं तं समानीय च बत कृतवर्मान्वितं प्रेरणात् ते
सत्राजिन्मृत्युमूलं धृतमणिमधुनो रत्नशङ्कां जनानाम् ॥५॥

दृष्ट्वाथो याज्ञसेन्या वरवरणविधिं सत्यभामासमेतः
कृत्वेन्द्रप्रस्थमेषां द्विपपुरि निवसन् पाण्डवानां पुनश्च ।
त्वद्वाचा भद्रमूर्तिं तव खलु सहजां फल्गुने भिक्षुरूपे
भद्रां हर्तर्यतः क्रोधनबलमनुनीयागमो धर्मजादीन् ॥६॥

तत्र क्रीडन् गृहीत्वा पुनरपि यमुनाकूलतः सूरपुत्रीं
गत्वा त्वं खाण्डवप्रीणितपवनसखः स्वं पुरं तत्र भूयः ।
हृत्वावन्तीं नृपाणां परिषदि निरतां मित्रविन्दां त्रयीमां
बद्ध्वोक्ष्णः सप्त सत्यां सुतनुमुदवहः सप्तमूर्तिः क्षणार्धात् ॥७॥

भद्रां सन्तर्दनाद्याः खलु ददुरथ तत्सोदरीं तेऽथ लक्ष्यं
दुष्प्रेक्ष्यं त्वं विभिन्दन् मृगदृशमहृथा लक्षणां मद्रपुत्रीम् ।
अष्टावासन् महिष्यस्तदनु वृषगिराकर्ण्य भौमस्य चेष्टाः
कष्टास्तद्धाम भामां दधदजित भवानाविशत् पत्रिपत्रः ॥८॥

भित्त्वा दुर्गाणि कृत्वा मृधमतिभयदं तत्र यातं मुरं तं
युद्धायाम्भोधिमध्यात् कृतविविधरणं पञ्चवक्त्रं कठोरम् ।
हत्वा चक्रेण युद्धागतमथ नरकं हस्तिवीरैर्महद्भि-
र्युध्यन्तं निष्ठुरं तं कुपितहृदकरोश्चक्रकृत्तोत्तमाङ्गम् ॥९॥

भूयो भूम्या नुतस्त्व सकरुणभगदत्ताख्यपुत्रेऽस्य राज्यं
प्रादाश्चैकं गजं चाप्यजित गमितवान् शिष्टनागान् पुरीं स्वाम् ।
मुग्धाक्षीर्भौमबन्दीकृतसुभगतमद्व्यष्टसाहस्रसंख्या-
श्चार्थौघानिन्द्रमात्रे नरकहृतमदाः कुण्डलं त्वं सभामः ॥१०॥

भामोक्त्याहृत्य देवद्रुममथ विबुधान् द्रोग्धुकामान् स जित्वा
भामागेहे निधाय द्रुममुमुदवहो द्व्यष्टसाहस्रयोषाः ।
भूयो भूरिस्वरूपस्त्रिदशमुनिनुतो लालयंस्तासु केली-
भेदैः सर्वासु तन्वन् दश दश तनुजान् वात्वगारेश पायाः ॥११॥

२८

त्वत्पुत्रो रौक्मिणेयः क्वचिदहनि हृतः शम्बरेणाथ हत्वा
प्रद्युम्नस्तं च रत्या निजसदनगतः सोऽहरद् रुक्मिकन्याम् ।
तत्पुत्रो रुक्मिपौत्रीमुदवहदमलां रोचनां सोऽनिरुद्ध-
स्तत्रागास्त्वं समितः स च हलभृदहन् रुक्मिणं द्यूतवैरात् ॥१॥

त्वत्पौत्रं बाणपुत्र्यां स्वपनगतममुं चानुभूयानिरुद्धं
स्वप्नान्तेऽवीक्ष्य चैनं स्मरशरविवशायामुषायां सखी सा ।
चित्रे संलिख्य यूनः सुदृगवगतमानेष्ट तं योगशक्त्या
रात्रौ तत्रोषया तं सुखमथ रममाणं बबन्धैष बाणः ॥२॥

श्रुत्वैतन्नारदोक्तं प्रकुपितयदुभिस्तत्पुरं शोणिताख्यं
गत्वा तद्द्वारपालं शिवशिव गिरिशं मोहयामासिथ त्वम् ।
कृत्वा युद्धं समिद्धं तदनु स विजितः कामबाणैर्विशाखो
युध्यद्भिर्यादवैस्तत्प्रमथकुलमलं कातरं सम्बभूव ॥३॥

कुम्भाण्डं मन्त्रिवर्यं समहरदशनैः कामपालस्तदानीं
जृम्भत्कोपः प्रपेदे रणभुवि धनुषां पञ्चशत्या स बाणः ।
भूयोऽस्मिन् भिन्नचापे गतवति गतवानुज्वरस्त्वज्ज्वरेण
श्रीमन् वेगाज्जितोऽभूत् पुनरपि युयुधे त्वां समागत्य बाणः ॥४॥
कृत्वा युद्धं त्वयाथो दितिसुतकुमतेः खण्डिते दोस्समूहे
त्र्यक्षोक्त्या दोश्चतुष्कं त्वयि ददुषि तदा सोऽपि तेऽदात् सहोषम् ।
त्वत्पौत्रं त्वं च सर्वैः सह पुरमगमः स्वं कदचिन्नृगाख्यं
विप्रामर्षान्निकृष्टाकृतिमजित भवान्मुक्तशापं वितेने ॥५॥
भूमन् स्वेभ्यो जनेभ्यो द्विजपरिचरणं प्रोचिथ त्वं वरिष्ठं
रामे भूयः प्रविष्टे व्रजकुलमबलासक्तचित्ते मदान्धे ।
हृतानायातकालस्वसृमददमनेऽलारमत्यद्भुतात्मन्
दूतोक्तं पौण्ड्रकीयं वचनमथ भवद्दूषणं चाशृणोस्त्वम् ॥६॥
भूयस्तं प्राप्य दृष्ट्वा सह यदुभिरमुं पौण्ड्रकं वासुदेवं
तावत्काङ्काङ्किताङ्गं विधुरहमपरः कोऽत्र वा वासुदेवः ।
एवं मन्वानमद्धा प्रकुपितहृदयस्तस्य चक्रेण भिन्दन्
शीर्षं तं मित्रकाशिक्षितिपतिमकरोश्चक्रकृत्तोत्तमाङ्गम् ॥७॥
कृत्यायां काशिराजात्मजमहितहरप्रेरितायां युतायां
त्रस्तैर्भूतैर्दहन्त्यामखिलमपि पुरीं तेऽथ यान्त्यां जनौघैः ।
प्रोक्तोऽपि द्यूततस्त्वं किमपि न चलितः प्राहिणोः कालचक्रं
पार्श्वस्थं तत्तु कृत्यां नृपतिसुतममुं तत्पुरीमप्यधाक्षीत् ॥८॥

रक्षोघाते पुरा ते कृतमहदुपकारोऽपि दुष्टत्वमाप्तः
कष्टं शिष्टोपरोधी स हि खलु विविदस्त्वत्कलामृत्युकाङ्क्षी ।
कृत्वा मद्यान्धनिद्रायितहलिनि खलस्तत्प्रियास्वप्यथागः
पिष्टोऽभून्मुष्टिघातैः प्रकुपितहलिना निष्ठुरैर्मुक्तजीवः ॥९॥

श्रीमन् रामोऽथ साम्बं कुरुवरतनयामाहरन्तं निबद्धं
कौरव्येण प्रमोक्तुं करिपुरमधिगम्याथ निन्दापरेऽस्मिन् ।
सामोक्त्या धार्तराष्ट्रे निरवधिकरुषोद्धूतहस्त्यालयस्तं
व्यामुञ्चन् धाम यातस्तव गुरुपवनागारनाथ प्रपायाः ॥१०॥

२९

भूमन्नर्कोपरागे पुरकृतकृतवर्मानिरुद्धः सयोषः
प्राप्तः प्रीतः समन्तोपरिसुपरिमिलत्पञ्चकं नाम तीर्थम् ।
भूयस्तत्रावगाह्य द्विजगणपरिमुक्तार्थसङ्घः समेतः
पार्थाद्यैस्त्वं प्रियाभिस्तव परिमिलिता याज्ञसेनी जहर्ष ॥१॥

त्वत्प्रेयस्युक्तनानाविधतरभवदाहृत्युपायश्रवात् सं-
तुष्टाभूद् याज्ञसेनी तदनु च पशुपान् वीक्ष्य तान् मानयित्वा ।
त्वद्विश्लेषातिशुष्यत्तनुभिरयि विभो वल्लवीभिः सबाष्पं
तत्र त्वं दृष्टमात्रः पुरुकुतुकमभूरन्वयासीः प्रहासी ॥२॥

आश्लेषाद्यैः पुरेवाजित पशुपवधूर्मज्जयन् मोदसिन्धौ
विश्लेषार्ति वदन्त्याः पृथुकुचकलशे राधिकाया न्यलैषीः ।
विश्लेषार्ति मनागुद्धववचनविनष्टावशिष्टां विशिष्टै-
स्तुष्टस्तासां वचोभिः पुनरपि शमयित्वासु चालीयथास्त्वम् ॥३॥

प्रारब्धे तत्र यागे तव खलु जनकेनाघनाशाय चाघै-
हीनेनाप्यद्भुतात्मन्ननवरतभवत्सन्निधानादिपुण्यैः ।
गोपा गोप्यः पुरावत् सहवसतिसुखं तेऽनुभूय त्रिमासं
याता गोष्ठं समाप्तक्रतुपितृसहितस्त्वं च गेहं स्वमागाः ॥४॥
बन्धक्लेशं विहन्तुं नृपकुलमहिनोन्मागधेनाथ बद्धं
बन्धक्लेशच्छिदे तेऽष्टकशतयुतविंशत्सहस्रप्रमाणम्(?) ।
बन्धुं कञ्चित् ततोऽस्मिन्नपि तव पुरमागत्य तद्याचमाने
बन्धूनां न्यस्तभारं त्वयि मखमशृणोर्नारदात् पाण्डवानाम् ॥५॥
कार्यद्वय्याकुले त्वय्यखिलविजयिनः सप्ततन्तोर्द्वयं तत्
कार्यं साध्यं सभायामिति वदति महत्युद्धवे जातमोदः ।
साकं त्वं बन्धुवर्गैः शमनसुतमितोऽभ्यर्थितस्तेन जेतुं
साकं भीमार्जुनाभ्यां मगधपतिमभूः प्रेषितो विश्वजेता ॥६॥
विप्रव्याजेन गत्वा मगधपमवृथा युद्धमाभ्यां समेतः
क्षिप्रं भीमेन साकं स च खलु युयुधे जातसादे च भीमे ।
दृष्ट्वोपायं त्वया दर्शितमहितममुं दारयत्याशु भूपान्
मुक्त्वादिश्यावितुं गां शमनसुतमगाः सार्जुनस्त्वं सभीमः ॥७॥
भक्ताढ्ये राजसूयं कृतवति सवनं धर्मजे भूसुराणां
चित्रं पादावनेजादिकमकृत भवान् भक्तदासः सभायाम् ।
भक्त्या तेऽथाग्र्यपूजां कृतवति सहदेवोक्तिमाश्रित्य भूपे
तुष्टे निश्शेषलोके स तु बत कुमतिश्चुक्षुभे चेदिराजः ॥८॥

स्त्रीघ्नं गोघ्नं गुरुघ्नं कपटपटुममुं गोपकं हन्त कोऽर्च्यात्
पूजार्हेष्वत्र सत्स्वित्यतिकुपितमतिः सायुधः प्रोदतिष्ठत् ।
तावत् क्रुद्धांस्तु पार्थानरिनिकटगतान् वारयन् स्वारिणा त-
च्छीर्षं भिन्दत्यगात् त्वय्ययमपि भवदैक्यं चिराद्वैरयोगात् ॥९॥

यागे सम्यक् समाप्ते जयति मुररिपुर्धर्मजश्चेति पुण्य-
न्मोदे जाते जनौघे मयविहितसभायां स्थलाम्बुभ्रमेण ।
मूढेऽस्मिन् धार्तराष्ट्रे भ्रमति सति समुज्जृम्भयन् याज्ञसेन्या
हासं कौरव्यशल्यायितममलदृशा पाहि मां मारुतेश ॥१०॥

३०

साल्वे भैष्मीविवाहे यदुवरविजिते व्योमकेशाद् विमानं
सौभं प्राप्य प्रभञ्जत्ययि तव पुरमाकर्ण्य तद्धस्तिनस्थः ।
प्रद्युम्नास्त्रप्रभीताधिकभटजनवीरद्युमन्मन्त्रिणं तं
गत्वा क्रुद्धो न्यरुन्धाः स च तव जनकं माययोत्थं व्यहिंसीत् ॥१॥

क्षिप्त्वा सौभं समुद्रे तमरिमरिनिकृत्तं त्वया तन्वताथो
युध्यन् कौमोदकीघट्टनविगलदसुर्दन्तवक्रो हतोऽभूत् ।
तस्मिन्नप्यैक्यमाप्ते कुरुवरनिकृताया हरे याज्ञसेन्याः
कृत्वानन्तं दुकूलं सकरुण कपटद्यूतकेऽपालयस्ताम् ॥२॥

त्रस्ता दुर्वाससः साशनमभिलषतस्त्वां व्यचिन्तीदनन्ना
गत्वा शाकान्नभुक्त्या मुनिकुलमकरोस्तृप्तिमत् काननान्ते ।
युद्धोद्योगे वृतस्त्वं तदनु च विजयेनात्तदौत्यस्तदर्थं
गत्वा कौरव्यमेनं सकलमपि वदन् धिक्कृतोऽभूः खलेन ॥३॥

क्रुद्धत्वद्विश्वरूपेक्षणचलितजनायां सभायां कुरूणां
क्षत्ता भूत्वार्जुनस्याकुलमलममुमालोक्य मिथौघघाते ।
उक्त्वा विज्ञानवाक्यान्यजित धृतमहाविश्वरूपोऽस्य शङ्का-
भेत्ताभूर्भीष्मयुद्धे महति सति ततः प्राप्तसादोऽर्जुनोऽभूत् ॥४॥

निशस्त्रात्वप्रतिज्ञां प्रतिघमभिनयन् प्रोज्झ्य चक्र्यन्वधावो
भीष्मं सोऽप्यानमत् त्वां क्वचिदथ भगदत्तस्य नारायणास्त्रे ।
भूषाजाते तवोरस्यरिपिहितरविः प्रार्दयः सिन्धुराजं
नागास्त्रं चाकृथास्त्वं क्षितिमवनमयन् निष्फलं कर्णमुक्तम् ॥५॥

युद्धादौ तीर्थगामी स खलु मुसलभृन्नैमिशक्षेत्रमृच्छन्
हत्वानुत्थायिसूतं बत सुतमदसीयं पदे तस्य तन्वन् ।
हत्वा यज्ञद्रुहं पर्वणि कुपितमतिर्वल्कलं स्नाततीर्थो
युद्धान्ते भीमदुर्योधनमृधमशमं वीक्ष्य सोऽगात् पुरीं ते ॥६॥

सुप्तानां स्वात्मजानां गुरुतनयकृतं निग्रहं याज्ञसेन्यां
श्रुत्वा सम्मोहितायां त्वमपि सविजयो द्रौणिमापोऽथ पार्थे ।
सत्रा तन्मौलिरत्नेन च तव वचसा ब्राह्ममेतत्प्रयुक्तं
हर्तर्यस्त्वं पुनश्चौत्तरजठरमगात् तच्छरो गर्भहान्यै ॥७॥

तद्गर्भान्तप्रविष्टत्वदरिघृणिविदग्धे शरेऽस्मिन् स भीष्म-
श्चोक्त्वा धर्मान् समस्तान् शमनसुतनृपायागमद् ब्रह्मभूयम् ।
देव त्वं चाश्वमेधैस्त्रिभिरतिमहितैर्धर्मजन्मानमेनं
संयाज्याविश्य धाम स्वकमथ सुदृशो लालयन् सन्न्यवात्सीः ॥८॥

भूमन् विप्रः कदाचित् तव परमसतीर्थ्यत्वमाप्तः कुचेलः
प्रोचे पत्न्या प्रिय त्वं भज तव सुहृदं माधवं वृत्तिलब्ध्यै ।
एवं क्षुत्पीडयासावपि तदनु भवद्गाढसन्दर्शनोत्कः
प्रापत् त्वां प्राभृतार्थं दधदयि पृथुकान् जीर्णवस्त्रैकभागे ।।९।।

भूयस्त्वत्पूजितं तं द्विजमथ रमया वीजितं भीष्मपुत्र्या
मोदाकूपारमग्नं तव वपुरवलोकेन पाणौ गृहीत्वा ।
पूर्वोदन्तं न्यगादीर्गुरुवरगृहिणीचोदितैरिन्धनार्थं
प्रागावां काननेऽभ्यर्थयि सखि भवता विस्मृतं वाधुनैतत् ।।१०।।

व्रीळालोले कुचेले पृथुकमथ बलादाहरन् मुष्टिना तं
प्राश्नन् संवारितोऽभूरलमिति रमया सोऽपरेद्युर्विना स्वम् ।
यातो याचे स्म चेद्दास्यति हरिरहमार्यां ब्रुवे किन्तु मार्गे-
ऽप्येवं चिन्तां वितन्वन्नहह मणिमयं गेहमग्रे ददर्श ।।११।।

पत्नीं च त्वत्प्रभावान्मणिकटकमुखैर्मण्डिताङ्गीं स दृष्ट्वा
स्मृत्वा स्मृत्वा विलासांस्तव खलु नितरां मोदमग्नो न्यवात्सीत् ।
त्वरया मातुश्च कंसप्रमथितसुतषट्कं बलेः सन्निधाना-
न्नीत्वास्यै तत्प्रदर्श्य स्वपदमनयथाः सोऽव मां मारुतेश ।।१२।।

३१

देवं देव श्रुताद्यं द्विजकुलजनुषं मैथिलं प्राप्य राज्यं
भूपं चानुग्रहीतुं क्वचिदथ बहुलाश्वं द्विमूर्तिर्द्वयोश्च ।
गेहे यातोऽच्युताभ्यर्चित इह युगपत् कन्दपक्वादिनैके-
नान्येनान्नादिभोज्यैः सममथ मुदितो मुक्तिमाभ्यामदास्त्वम् ।।१।।

श्रुत्वा विप्रस्य रोदं सुतमृतिविधुरस्यावसो मौनिवत् त्वं
नष्टा अष्टापि पुत्रा विविधमपि जने भाषमाणे स पार्थः ।
गत्वा त्वद्धाम तिष्ठन् नवमसुतमृतौ विप्ररोदं च शृण्वन्
चक्रे मानी प्रतिज्ञामनविततनयो वर्ष्म भस्मीकरिष्ये ॥२॥

अस्त्रौघैः सूतिगेहं द्विजवरसुदृशः सन्निरुध्याथ भूयः
पुत्रे दृष्टे विनष्टे भुवि दिवि च तमन्विष्य चावीक्ष्य पार्थम् ।
नश्यद्दर्पं निवार्याजित शिखिनि पतिष्यन्तमेतेन साकं
विक्रामंश्चक्रवालं ह्यहर उरुतमश्चक्रधाम्ना रथेन ॥३॥

गत्वा दुग्धाब्धिमध्यं फणिवरशयनं दिव्यभूषायुधाङ्गं
शुद्धं चाम्नायमूलं विधिहरमुनिमुख्येडितं चिन्मयं त्वाम् ।
दृष्ट्वा पार्थेन साकं त्वयि नमति युवां द्रष्टुकामोऽनयं भोः
कृष्णामून् विप्रपुत्रान् नयतमिति वदंश्चित्स्वरूपो ददौ तान् ॥४॥

नत्वा त्वां त्वं सपार्थः क्षितितलमुपविश्याथ विप्राय दत्त्वा
पुत्रान् विप्रेण पार्थेन च नुतमहिमा सचिरदात्मन् न्यवात्सीः ।
प्राप्ते विज्ञानसारं तव पितरि विभो नारदात् त्वत्प्रसादात्
त्वत्तो लब्धबोद्धवस्तत् स तु सुजनहितायाधुनास्ते बदर्याम् ॥५॥

ये ये भूमन् भजन्ते विमलतरहृदा वीतसङ्गा भवन्तं
तेषां मुक्तिः कराग्रे ध्रुवमजित कदापि च्युतिर्नैव भूयात् ।
केचिच्छर्वादिदेवान् क्षणमुदितमतीन् क्षिप्रकोपानशान्ताः
सेवित्वाप्ताः पतन्त्यत्र तु शकुनिसुतः सोऽत्र दृष्टान्तभूतः ॥६॥

आविष्कृत्यैकदा धूर्जटिमुखतपसा वासरैः सप्तमावै-
र्वाचा वीणाधरस्य द्रुतमुदमवृणोच्छकुनेयोऽखिलानाम् ।
पाणिस्पर्शेन मृत्युं शिरसि ददुषि च वीक्षणे तत् तमेवा-
धावत्यस्मिन् प्रभीतः शिवशिव गिरिशश्चाद्रवत् पृष्ठदृष्टिः ॥७॥

जोषं तिष्ठत्सु सर्वेष्वधिकपरवशे धूर्जटौ ब्रह्मचारी
प्रादुर्भूयासुराग्रे वदति च भगवन् भोः पिशाचस्य वाक्ये ।
विश्वासस्तेऽस्ति किं मे गिरि यदि तव शङ्काङ्गुलीं मूर्ध्नि कुर्वि-
त्युक्तः स्पृष्टोत्तमाङ्गोऽमृत बत भगवंस्त्वत्पराचां क्व भद्रम् ॥८॥

भूमन् सारस्वतैस्तैर्मुनिवरनिवहैः प्रेषितो ज्ञातुकामै-
र्मूर्तित्रय्यां महद्भिर्भृगुमुनिरधिकां सत्त्वतां सोऽथ दृष्ट्वा ।
धातुर्भर्गस्य कर्म स्वगुणसमुचितं सुप्तमङ्के रमाया-
स्त्वां निघ्नन्नङ्घ्रिणायं द्रुतमथ भवता वन्दितोऽभून्मुनीन्द्रः ॥९॥

भूमन् सर्वं क्षमस्वोरसि मम तव यत् पादचिह्नं तदत्र
श्रीवत्साख्यान्वितं भूषणमिति कलये नित्यमेवं त्वयोक्तः ।
सोऽगात् सन्तुष्टचेता मुनिवरनिवहाश्चेतदाज्ञाय तं त्वां
सेवित्वा मुक्तिमापुर्ननु सकलजनैः सेवनीयस्त्वमेव ॥१०॥

विष्णो दुर्वारगर्वान्धितनृपतिकृतक्ष्माभरध्वंसनार्थं
कृष्णो भूत्वाथ कृत्वा खलजनविहतिं शिष्टरक्षां तदन्ते ।
पुष्णन् द्वेषानुरागप्रणयभयवशात् त्वद्गतस्वान्तनॄणां
विश्वात्मन् मोक्षलक्ष्मीं ननु च दिश विभो वातगारेश मोक्षम् ॥११॥

३२

कृष्ण त्वदङ्घ्रिभजनं भयहारि मन्ये
मग्नस्य मर्त्यनिवहस्य भवाब्धिमध्ये ।
यस्त्वत्परः स तु चरन्नपि मोहमार्गे
कुत्रापि न स्खलति तस्य पुनः कुतो भीः ॥१॥

यद्यत् करोमि भगवंस्तनुवाङ्मनोभि-
स्त्वत्प्रेरितो भवति तत्तदिहार्पयामि ।
त्वद्भक्तकर्मनिवहः श्वपचोऽपि लोकं
शुद्धं करोति विमुखस्त्वयि नैव विप्रः ॥२॥

भीरन्यतोऽस्ति ननु मानसकल्पितोऽन्य-
स्तेनैवयचिन्तनपरो भयमाशु जह्याम् ।
मायाहृते हृदि न भाति तथा ततोऽस्या
नाथं भजन्नभय एष भवेच्च भक्त्या ॥३॥

भक्तेर्जनिस्तदभिवृद्धिरपीह लभ्या
त्वत्पादसेवकजनाश्रयतस्ततो मे ।
तत्सङ्गतिं कुरु तदार्यविलोकिमषद्भि-
स्त्वत्कीर्तनैर्भवति भक्तिरहो द्रढिष्ठा ॥४॥

मुक्तिप्रदासु सरणिष्वधिकादरोऽहं
भक्तावनन्तमहिमन्नवतारलीलाः ।
नित्यं च नामनिवहांश्च पठन् द्रुतात्मा
नृत्यन् रुदन् वदन हास्यपरश्चरेयम् ॥५॥

भूतानि भूतमयमानुषतिर्यगादीन्
शत्रून् समांश्च सुहृदो भवदात्मबुद्ध्या।
तुष्ट्यानमान्यथ ममेति भवत्परस्य
भक्तिर्विभक्तिरपि मुक्तिरपीश सिद्ध्येत् ॥६॥

त्वच्चिन्तनामृतरसाधिकपानतृप्त-
चित्तस्य मे क्व नु तृडार्तिरपि क्षुधार्तिः।
इष्टेषु तुष्टिमपि शोकमनिष्टजाले
त्यक्त्वा चरेयमिह मायिकतावबोधात् ॥७॥

भूमंस्त्वदैक्यमयचिन्तनयोग्यताद्य
भूतेषु नो यदि ममास्तु भवत्यमेयम्।
प्रेम त्वदीयहितताद्यथवा त्वदर्चा-
दास्यादरं दिश ततोऽप्यहमुत्तमः स्याम् ॥८॥

आवृत्य रूपमयि ते विमलां क्षिपन्ती
जीवान् स्वकर्मविवशान् व्यसनेषु माया।
मां माभिभूदयि पुरा त्वयि भक्तिरेका
मायाजयाय कुशलेत्यवदत् प्रबुद्धः ॥९॥

दुःखानि जन्तुषु विलोक्य विरक्तबुद्धि-
र्लब्ध्वा गुरोःकरुणया तव तत्त्वबोधम्।
त्वज्जन्मकर्मकथनोदितभक्तिभूमा-
विद्यां तरेयमनिलेश भवत्प्रसादात् ॥१०॥

३२

कर्माणि वेदविहितानि फलानपेक्षं
त्वय्यर्पितान्यनुचरन्नुचितानि यानि ।
नैष्कर्म्यमागमविरुद्धविधौ ममेच्छा
मा भूद्विभो कुरु दयां भगवन्नमस्ते ॥१॥

त्वत्क्षेत्रसङ्गतिविधौ धृतकौतुकं मे
पादं कुरुष्व करमर्चनपुष्पलोलम् ।
त्वन्मूर्तिदर्शनविधौ नयनं च जिह्वां
त्वत्कीर्तने तव कथाश्रवणे श्रवं च ॥२॥

शूद्रा स्त्रियस्तव कथाश्रवणादिहीनाः
सर्वेऽपि तेऽजित भवन्त्यधिकं दयार्हाः ।
त्वद्ध्यानकीर्तनमुखेष्वधिकारमाप्ता-
स्तन्वन्ति हा क्षितिसुरा न हि तानि दृप्ताः ॥३॥

पापो ह्ययं निजकुवृत्तिविधानकामः
श्रीकृष्ण राम इति नामजपं करोति ।
भ्राता सदा मम हरिं भजते किलाद्ये-
त्येते हसन्ति सरसांस्त्वयि हन्त कष्टम् ॥४॥

श्वेतं कृते मुनितनुं तपसा भजन्ते
त्रेतायुगे मखतनुं ह्यरुणं यजन्ते ।
श्यामं युगेऽन्यति(?) भजन्ति नरोऽत्र मार्गै-
र्नीलं कलौ नुतिभिरेव भजन्ति तं त्वाम् ॥५॥

कालः कलेरयि जयत्ययमत्र यत् त्वां
नाम्नां जपेन भजतां प्रददासि मुक्तिम् ।
जाताः कृतादिषु कलौ किल कामयन्ते
हा जन्म तत्र जनितं परिपाहि मां त्वम् ॥६॥

भक्ताः कलौ द्रमिलभूषु ततोऽधिकाः स्युः
कावेरिकादिसरिदन्तरवासिनस्ते ।
मां चैतदन्तरजमप्ययि किञ्चदञ्चत्-
स्नेहं त्वयि भ्रमय मा भगवन्नमस्ते ॥७॥

पश्यन् वृषद्रुहममुं स पुरा परीक्षि-
द्धन्तुं कलिं व्यवसितोऽपि न चावधीत् तम् ।
स्मृत्वा गुणांशमिह नामजपादिनैव
सिध्येद् गतिर्द्रुतमसौ भवदीयभीरुः ॥८॥

एकादशी च तव नामजपश्च साळ-
ग्रामार्चनं च तुलसी च सरिच्च गीता ।
गायत्र्यपीह गतिदा लघु गोपिका चे-
त्याहुर्बुधाः कलियुगेऽस्तु रतिर्मदर्हे ॥९॥

कृत्यान्युपेक्ष्य सकलान्यपि सर्वथापि
यस्त्वां सदा भजति तस्य नहि प्रपीडा ।
आत्मन्यृणत्रयकृतास्यविकर्मजातं
चित्तस्थितो नुदसि यन्मरुदीश पायाः ॥१०॥

३४

स्नेहं विमुच्य सुहृदादिषु दत्तचित्ता-
श्चेतोहरे त्वयि निरीक्ष्य जगत् समस्तम् ।
मायाविलासमयि केचिदहो भजन्ति
त्वां योगिनो वयमपि प्रणुमो भवन्तम् ॥१॥

क्षुत्तृड्विलोपरतजन्तुषु पूरुषो हि
विज्ञानवत्त्वत इनः सुलभं न लोके ।
तज्जन्म चात्र च सुहृद्रिपुरस्ति चात्मा
स्वस्यैव यस्त्वयि रतः स सुहृत् परोऽरिः ॥२॥

उर्व्याः क्षमां पवनतो विषयाप्रसक्तिं
निर्लेपतादि वियतो जलतोऽमलत्वम् ।
सर्वान्नभोजनविधावनवद्यताद्यं
गृह्णन्ति मारुतसखाद् भवदात्मनिष्ठाः ॥३॥

इन्दोः कलोपचयहानिवदत्र वेत्ति
वृद्धिक्षयौ च वपुषस्तु न चात्मनस्तौ ।
अम्ब्वादिबिम्बितविरोचनवच्छरीरे-
ष्वेकत्वमात्मन इहाजित वेत्ति विद्वान् ॥४॥

स्नेहान्मृतो मृगयुकृत्तसुतेषु पत्न्या
साकं कपोत इव नैव भवेत् सुविद्वान् ।
सोऽस्त्याप्तमेव शयुवत्पुनरप्यगाधो
भूयात् समुद्र इव भृङ्गवदात्तसारः ॥५॥